Actions and uses—Alterative and gastric stimulant; given in chronic diarrhoea, dyspepsia and general anasurra. Locally as a vesicant the root causes more pain than the ordinary blisters and the vesication does not heal readily. A paste of the root is used as a stimulant application

to rheumatic joints, leprosy, paralytic limbs and to abscesses to promote suppuration. The compound powder is alterative and given in flatulence, rheumatism. The root is acrid and if introduced into the os uteri causes abortion. Lal Chitraka is a more powerful vesicant than chitro or safed chitraka and is used in the preparation of caustic application. Taken internally it is said to expel the foetus whether dead or alive. In large doses it is a narcotico irritant poison. (*Materia Medica of India*—R. N. Khory, Part II., p. 381).

चुक्र:

Oxalis corniculata

चुक्रम् , चाङ्गेरी–*Oxalis corniculata*. **वास्तुक:**–*Chenopodium album*. **तद्भेदा:**–**पलाशलोहिता चिल्ली**–*Chenopodium album* (Purple), **श्वेतचिल्ली**–*C. album* (Green), **शुनकचिल्ली**–*C. laciniatum*.

अन्वर्थसंज्ञा– चुक्रस्य– "अम्लवास्तुकम्", "दलाम्लम्"। 'वास्तुकस्य'–"शाकराज:"। 'पलाशलोहिताया:'–"मृदुपत्री", "क्षारदला", "चोरपत्री"। "श्वेतचिल्ल्या:'–सुपथ्या", "क्षुद्रवास्तुकी", "ज्वरघ्नी"। 'चुक्रं' स्यादम्लपत्रन्तु लघूष्णं वातगुल्मनुत्। रुचिकृद्दीपनं पथ्यमीषत्पित्तकरं परम्॥ 'वास्तुकं' तु मधुरं सुशीतलं क्षारमीषदम्लं त्रिदोषजित्। रोचनं ज्वरहरं महार्शसां नाशनञ्च मलमूत्रशुद्धिकृत्॥ 'चिल्ली' वास्तुकतुल्या च सक्षारा श्लेष्मपित्तनुत्। प्रमेहमूत्रकृच्छ्रघ्नी पथ्या च रुचिकारिणी॥ 'श्वेतचिल्ली' सुमधुरा क्षारा च शिशिरा च सा। त्रिदोषशमनी पथ्या ज्वरदोषविनाशनी॥ 'शवचिल्ली' कटुतीक्ष्णा च कण्डूतिव्रणहारिणी॥ 'चाङ्गेरी'शाकमत्युष्णं कटु रोचनपाचनम्। दीपनं कफवातार्श:सङ्ग्रहण्यतिसारजित्॥ राजनिघण्टु:॥ ...त्रिदोषघ्नं भिन्नवर्च्चस्तु 'वास्तुकम्'। प्रशस्यतेऽम्ल'चाङ्गेरी' ग्रहण्यर्शोहिता च सा॥ सू. २७ अ.-चरक:॥ कटुर्विपाके कृमिहा मेधाग्निबलवर्द्धन:। सक्षार: सर्वदोषघ्नो 'वास्तुको' रोचक: सर:॥ चिल्ली वास्तुकवज्ज्ञेया...॥ सु. ४६ अ.–सुश्रुत:॥ वास्तुकस्तु सरो हृद्यो दोषनुत् पाकतो लघु:। सक्षार: कृमिहा मेध्यो रुच्योऽग्निबलवर्द्धन:॥ लघुपत्रा तु या 'चिल्ली' सा वास्तुकसमा मता। 'चाङ्गेरी' तु कषायोष्णा मधुरा वह्निदीपनी॥ साम्ला वातकफो हन्ति ग्रहण्यर्शोविकारनुत्। 'चुक्रकं' दुर्जरं भेदि अम्लं पित्तकरं गुरु॥ 'चक्रपाणि:॥ "चाङ्गेरी" दीपनी रुच्या रूक्षोष्णा कफवातनुत्। पित्तलाम्ला ग्रहण्यर्श:कुष्ठातिसारनाशिनी॥ 'वास्तुकद्वितयं' स्वादु क्षारं पाके कटूदितम्। दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम्॥ सरं प्लीहास्त्रपित्तार्श:कृमिदोषत्रयापहम्। 'चुक्रा' त्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत्॥ रुच्या लघुतरा पाके कट्वी च नातिरोचनी। भावप्रकाश:॥ कटुर्विपाके कृमिहा मेधाग्निबलवर्धन:। संस्कारे सर्वदोषघ्नी 'वास्तुको' रोचन: सर:॥ 'चाङ्गेरी' कफवातघ्नी वह्निकृद् ग्राहिणी हिता। राजवल्लभ:॥

वैद्यके व्यवहार:– (१) अर्श:सु चाङ्गेरी–"...चाङ्गेर्याश्चित्रकस्य च। सुभृष्टं यमके दद्याच्छाकं दधिसरायुतम्॥" (चि. ९ अ.)। (२) रक्तार्श:सु वास्तुक:– "छागलीपय:प्रयुक्तं निहन्ति रक्तं सवास्तुकं रसञ्च" (चि. ९ अ.)। (३) प्रवाहिकायां वास्तुक:–"...यमान्या वास्तुकस्य वा। ...शुष्कशाकेन वा पुन:॥ दधिदाडिमसिद्धेन बहुस्नेहेन भोजयेत्।" (चि. १० अ.)। (४) ...वातजकासे

वास्तुकः–"वास्तुकं शस्यते वातकासे तु..."। (चि. २२ अ.)। ऊरुस्तम्भे वास्तुकः–"शाकैरलवणैरद्याज्जलतैलोपसाधितैः...। वायसीवास्तुकैः... ऊरुस्तम्भविनाशनाः॥" (चि. २७ च.)। चरकः॥ कर्णशूले चुक्रः–"कर्णे कोष्णेण चुक्रेण पूरयेत् कर्णशूलिनः।" (उ. २१ अ.)। सुश्रुतः॥ चातुर्थकज्वरे चाङ्गेरी–"अम्लोटजसहस्त्रेण दलेन सुकृतां पिबेत्। पेयां घृतप्लुतां जन्तुश्चातुर्थकहरां त्र्यहम्॥" (ज्वर-चि.)। चक्रदत्तः॥

विविध भाषाओं में नाम–

चुक्र– सं.- चुक्रम्, सहस्त्रवेधिभुक्तम्। हि.- चूक, चूका। मा.- चूका, गु.- चुका।

चांगेरी– सं.- चाङ्गेरी, चुक्रिका, दन्तशका, अम्वष्ठा, अम्ललोणिका। हि.- चांगेरी, अम्लिलोण, अम्लि लोना, अम्ली, खट्टी बूटी। प.- खटकल, छोटा चूका, अमला, चौपतिया। बं.- आमरुल। म.- आम्वती। गु.- चूकी, आंवोती। क.- पुणुवुंणितो, पुल्ल पुलुचे। तै.- पुलिचिन्ता। द्रा.- पुदिवरी। अं.- Indian sorel (इन्डियन सोरेल)। ले.- Oxalis corniculata (ओक्सेलिस कोर्निकुलेटा)।

चुक्र की अन्वर्थ ज्ञापिका संज्ञा- अम्लवास्तूकम्, दलाम्लम्। **वास्तुक की अन्वर्थ ज्ञापिका संज्ञा-** शाकराजः। **पलाशलोहिता की अन्वर्थ ज्ञापिका संज्ञा-** मृदुपत्री, क्षारदला, चोरपत्री। **श्वेतचिल्ली की अन्वर्थ ज्ञापिका संज्ञा-** सुपथ्या, क्षुद्रवास्तुकी, ज्वरघ्नी।

गुण-दोष–

राजनिघण्टु के अनुसार- चुक्र अम्लपत्र वाला, हल्का तथा उष्ण है और वात गुल्म को दूर करता है। यह रुचिकारक, जाठराग्नि दीपक, पथ्य तथा थोड़ा पित्तवर्द्धक है। वास्तूक (वथुआ) शाक मधुर, शीतल, क्षारीय तथा थोड़ा अम्ल है और त्रिदोष को दूर करता है। यह रुचिकारक, ज्वरहर, बढ़े हुए अर्श रोग का नाश करने वाला तथा मल एवं मूत्र को शुद्ध करता है। चिल्ली वास्तूक शाक के गुण के समान है, क्षारीय है तथा कफ तथा पित्त विकार को दूर करती है। यह प्रमेह रोग तथा मूत्रकृच्छ्र का नाश करती है, पथ्य है तथा रुचिकारक है। श्वेत चिल्ली शाक मधुर रस वाली, क्षारीय तथा शिशिर (शीतल) है और त्रिदोष शामक, पथ्य तथा ज्वर दोष नाशक है। श्वेत चिल्ली कटु रस प्रधान तथा तीक्ष्ण गुण वाली है और यह कण्डू तथा व्रण को दूर करने वाली है। चाङ्गेरी शाक अत्यन्त उष्ण, कटु रस प्रधान है तथा रोचक एवं पाचक है। यह जाठराग्नि दीपक है और कफ, वात विकार, अर्श रोग, संग्रहणी रोग तथा अतिसार का नाश करती है।

चरक के अनुसार- बास्तूक त्रिदोष नाशक तथा मलभेदक है। अम्ल चांगेरी प्रशस्त है और ग्रहणी तथा अर्श रोग के लिए हितकर है। (च.चि.अ.२७)।

सुश्रुत के अनुसार- वास्तुक शाक पाक में कटु, क्रिमि नाशक, मेधा, जाठराग्नि तथा बल को बढ़ाने वाला है। यह क्षारीय गुण वाला है, सभी दोषों का नाश करने वाला है तथा रोचक एवं सारक है। चिल्ली शाक वास्तूक के गुण के समान गुण वाला है। (सू.सू.अ.४६)।

चक्रपाणि के अनुसार- वास्तूक शाक सारक, हृदय के लिए हितकर दोष नाशक तथा पाक में लघु है। यह क्षारीय गुण वाला, कृमिनाशक है तथा मेधा, जाठराग्नि एवं बल को बढ़ाने वाला है। छोटी पत्ते वाली चिल्ली वास्तुक के समान गुण वाली है। चाङ्गेरी शाक कषाय रस प्रधान, उष्ण तथा मधुर है और यह जाठराग्नि दीपक है। यह अम्ल रस प्रधान होने से वात का नाश करता है और ग्रहणी एवं अर्श विकार को दूर करता है। चुक्र शाक दुर्जर, मलभेदक, अम्ल है तथा पित्त कारक एवं गुरु है।

भाव प्रकाश के अनुसार- चाङ्गेरी शाक जाठराग्नि दीपक, रुचि कारक रूक्ष तथा उष्ण है और यह कफ-वात रोग को दूर करता है। यह पित्त कारक है, अम्ल है और ग्रहणी, अर्शरोग, कुष्ठ रोग तथा अतिसार रोग का नाश करता है। दोनों प्रकार का वास्तुक शाक स्वादिष्ट, क्षारीय तथा पाक में कटु है। यह जाठराग्नि दीपक, पाचक, रुचि कारक, लघु तथा शुक्र एवं बल को बढ़ाने वाला है। यह सारक है और प्लीहा विकार, रक्त पित्त, अर्श, क्रिमि रोग तथा तीनों दोषों का नाश करने वाला है। चुक्र अधिक अम्ल, स्वादिष्ट, वात नाशक तथा कफ पित्त को बढ़ाता है। यह रुचिकर, हल्का, पाक में कटु तथा अधिक रुचि कारक नहीं है।

राजवल्लभ के अनुसार- वास्तूक शाक पाक में कटु रस प्रधान, क्रिमि नाशक तथा मेधा, जाठराग्नि एवं बलवर्द्धक है। यह संस्कार करने पर सभी दोषों का नाश करता है, रोचक तथा सारक है। चांगेरी शाक कफ-वात नाशक, वह्निकारक, ग्राही तथा हितकर है।

वैद्यक शास्त्र में चाङ्गेरी का प्रयोग-

(१) चाङ्गेरी शाक का अर्श में प्रयोग- चाङ्गेरी शाक तथा चित्रक के पत्ते का शाक घी तथा तैल में भूनकर दही के तोड़ के साथ अर्श रोग में दे। (च.चि.अ.९)। (२) **रक्तार्श में वास्तूक शाक का प्रयोग**- वास्तूक के शाक का रस बकरी का दूध मिलाकर प्रयोग करने से रक्तार्श का नाश करता है। (च.चि.अ.९)। (३) **प्रवाहिका में वास्तूक शाक का प्रयोग**- वास्तूक का शाक अजवायन के साथ अथवा सूखा शाक तथा आधि तैल घी के साथ अनार का रस मिलाकर सिद्ध किया हुआ शाक प्रवाहिक रोग में सेवन कराये। (चि.चि.अ.१०)। (४) **वातज कास में वास्तूक का शाक**- वातज कास में वास्तूक शाक प्रशस्त होता है। (च.चि.अ.२२)। (५) **उरुस्तम्भ में वास्तूक के शाक का प्रयोग**- वास्तूक का शाक तथा मकोय का शाक नमक रहित जल तथा तैल में सिद्ध ऊरुस्तम्भ रोग में प्रयोग करे। यह शाक ऊरुस्तम्भ रोग का नाश करता है। (च.चि.अ.२७)।

कर्णशूल में चुक्र का प्रयोग- कर्णशूल के रोगी के कान में चुक्र का थोड़ा गरम जल छोड़े। (सु.उ.अ.२१)।

चतुर्थिक ज्वर में चांगेरी का प्रयोग- चाङ्गेरी के एक हजार पत्तों से बनायी हुई तथा घृत मिलायी हुई मेवा चातुर्थिक ज्वर में पान करे। यह चातुर्थिक ज्वर का नाश करता है। (चक्र.ज्वर चि.)।

Constituents of *Oxalis corniculata*—It contains acid potassium oxalate.

Actions and uses—Cooling, refrigerant, appetizing and astringent; given in mild cases of dysentery, prolapse of the rectum and vagina, and as a stomachic in fever and billiousness. The fresh juice is given as an antidote to poisoning by Dhatura, (*Materia Medica of India*—R. N. Khory, Part II., p. 153).

Constituents of *Chenopodium ambrosioides*—Oleum Chenopodii, a volatile oil, 3 p.c., obtained by distilling the fruit with water or steam. It is a thin yellowish liquid, of a highly comphoraceous odour and pungent bitter taste, It consists of a hydrocarbon and a liquid oxygenated oil. Dose, 4 to 10 ms.

Actions and uses—Anthelmintic; used chiefly for round worms. As an antispasmodic and stimulant, the oil is given in hysteria, chorea,.flatulent dyspepsia and malarial and intermitten fevers. It increases the action of the heart and promotes the secretion of the skin, kidneys and bronchi. (*Materia Medica of India*—R. N. Khory, Part II., p. 507).

Many plants of Chenopodiaceae order are succulent, as the beet-root; some of them are

used as pot herbs; seeds of some are nutritious. Several contain a volatile oil which renders them anthelmintic, antispasmodic, aromatic, carminative and stimulant. Several of them inhabit salt marshes and yield on combustion an ash called Barilla, known to the Greeks as salt-wort. The Arabs called it elkali, arkali, of ushnar, sujikhara (Hindi)—a mixture of potash and soda. (*Materia medica of India*—R. N. Khory, Part II., p. 506).

जम्बूः

Eugenia jambolana

राजजम्बूः, महाजम्बूः– *Eugenia jambolana*, Lamarck., काकजम्बूः– *Eugenia caryophyllifolia*, Lamarck. भूमिजम्बूः– *Eugenia fruticosa*, Roxb.

पूर्वाचार्यकृतवर्णनम्– "जम्बूस्त्रिविधा, राजजम्बूर्महाफला, काकजम्बूर्वनजम्बूरितिख्याता, भूमिजम्बूरल्पफला" (चक्रदत्तकृतद्रव्यगुणसङ्ग्रहटीकायां शिवदासः)। अन्वर्थसंज्ञा राजजम्ब्वाः– "सुरभिपत्रा", "महाफला", "महास्कन्धा", "नीलफला", "राजार्हा", "शुकप्रिया", "मेघमोदिनी"। काकजम्ब्वाः– "नादेयी", "काकवल्लभा", "भृङ्गेष्टा"। भूमिजम्ब्वाः– 'ह्रस्वफला", "भृङ्गवल्लभा", "पिकभक्ष्या", "काष्ठजम्बूः"। जाम्बवं (जम्बूफलं) कफपित्तघ्नं ग्राहि वातकरं परम्। (चरकः–सू. २७ अ.–फ. व.)॥ अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित्। (सुश्रुतः–सू. ४६ अ. फ. व.)॥ जाम्बवं वातलं ग्राहि स्वाद्वम्लं कफवातजित्। हृत्कण्ठघर्षणं चान्यत् कषायं 'क्षुद्रजाम्बवम्'॥ धन्वन्तरीयनिघण्टुः॥ जम्बूः कषायमधुरा श्रमपित्तदाह-कण्ठार्त्तिशोषशमनी क्रिमिदोषहन्त्री। श्वासातिसारकफकासविनाशनी च विष्टम्भिनी भवति रोचनपाचनी च॥ 'महाजम्बू'रुष्णा समधुरकषाया श्रमहरा। निरश्यत्यास्यस्थं झटिति जडिमानं स्वरकरी। विधत्ते विष्टम्भं शमयति च शोषं वितनुते। श्रमातिसारार्त्ति-श्वसितकफकासप्रशमनम्॥ 'काकजम्बूः' कषायाम्ला पाके तु मधुरा गुरुः। दाहश्रमातिसारघ्नी वीर्यपुष्टिबलप्रदा॥ 'भूमिजम्बूः' कषाया च मधुरा श्लेष्मपित्तनुत्। हृद्या सङ्ग्राहिहृत्कण्ठदोषघ्नी वीर्यपुष्टिदा॥ राजनिघण्टुः॥ जम्बूः सङ्ग्राहिणी रूक्षा कफपित्तास्त्रदाहजित्। राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम्॥ भावप्रकाशः॥ जाम्बवं गुरु विष्टम्भि कषायं स्वादु शीतलम्। अग्निसन्दूषणं रूक्षं वातलं कफपित्तजित्॥ राजवल्लभः॥ जाम्बवं वातलं ग्राहि रूक्षं पित्तकफापहम्। द्रव्यगुणसङ्ग्रहः॥ 'तन्मज्जा' कषायो ग्राही विशेषान्मधुमेहहा। वृहन्निघण्टुरत्नाकरः॥

वैद्यके व्यवहारः– (१) अग्र्यग्रन्थे जाम्बवम्– "जाम्बवं वातजननानाम्" (सू. २५ अ.)। (२) व्रणरोपणार्थं जम्बूत्वक्– "...लोध्रजाम्बवकट्फलैः। त्वचमाश्वेव गृह्णन्ति त्वक्चूर्णैश्चूर्णिता व्रणाः॥" (चि. १३ अ.)। (३) पित्तजे वमने जम्बूपल्लवम्– "जम्ब्वाम्रयोः पल्लवजं कषायं पिबेत् सुशीतं मधुसंयुतं वा॥" (चि. २३ अ.)। चरकः॥ (१) अतिसारे शोणितस्त्रुतिवारणार्थं जम्बूत्वक्– "शल्लकीवदरीजम्बूत्वचः। पीताः क्षीरेण मध्वाढ्याः पृथक् शोणितनाशनाः॥" (अतिसार-चि.)। (२) बालग्रहण्यां जम्बूत्वक्– "तद्वदजाक्षीरसमो जम्बूत्वगुद्भवो रसः" (बालरोग-चि.)। चक्रदत्तः॥

विविध भाषाओं में नाम– सं.– जम्बूः, जम्बु, जाम्बवम्। हि.– जामून, बड़ाजामुन। हि.– बडाजामुन, बं.–

बड जाम, काल जाम। गु.- राजजाम्बू। क.- निरलू। म.- पोरजाम्भूह। ते.- पेद्दानेरडि। ले.- Eugenia jambolana, Lamarck. छोटी जामुन की- छोटी जामुन। बं.- वनजाम, छोटजाम। गु.- वेलरोवा जाम्बू।

जम्बू के सम्बन्ध में पूर्वाचार्यों का वर्णन- जम्बू तीन प्रकार का है- १. राज जम्बू बड़ा फल वाला होता है, २. काकजम्बू बनजम्बू कहा जाता है, ३. भूमि जम्बू अल्प फल वाली होती है। चक्रदत्त कृत द्रव्यगुण संग्रह टीका में है ऐसा शिवदास का कहना है।

तीनों जम्बू की अन्वर्थ ज्ञापिका संज्ञा- (१) राजजम्बू- सुरभिपत्रा, महाफला, महास्कन्धा, नीलफला, राजार्हा, शुकप्रिया, मेघमोदिनी (२) **काकजम्बू**- नादेयी, काकवल्लभा, भृङ्गेष्टा। (३) **भूमिजम्बू**-ह्रस्वफला, मृदुवल्लभा, पिकभक्ष्या, काष्ठजम्बूः।

गुण-दोष-

चरक के अनुसार- जामुन का फल कफ तथा पित्त नाशक है, ग्राही है तथा अच्छी तरह पित्त कारक है। (च.सू.अ.२७)।

सुश्रुत के अनुसार- जामुन का फल अत्यधिक वातकारक तथा ग्राही है और कफ विकार तथा पित्त विकार को दूर करती है। (सु.सू.अ.४६)।

धन्वन्तरि निघण्टु के अनुसार- जामुन का फल वात कारक, ग्राही तथा अम्ल रस वाला है और कफ विकार तथा वात विकार को दूर करता है। यह हृदय तथा कण्ठ का घर्षण करने वाला है तथा अन्य क्षुद्र जामुन का फल कषाय रस वाला है।

राजनिघण्टु के अनुसार- जामुन कषाय तथा मधुर रस वाली है और यह श्रम, पित्त विकार, दाह, कण्ठ पीड़ा एवं शोथ को शान्त करने वाली है और क्रिमि दोष का नाश करने वाली है। यह श्वास, अतिसार, कफ विकार तथा कास का नाश करने वाली है। यह विष्टम्भ कारक है तथा रोचक एवं पाचक है। **महाजम्बू** उष्ण, मधुर तथा कषाय रस वाली है और श्रम, थकावट को दूर करने वाली है। यह मुख की जड़ता का शीघ्र ही नाश करती है, और स्वर को बढ़ाती है। यह विष्टम्भ कारक है शोथ को शान्त करती है। यह थकावट तथा अतिसार का नाश करती है श्वास तथा कास को शान्त करती है। **काकजम्बू** कषाय तथा अम्ल रस वाली है और पाक में मधुर है तथा गुरु है। यह दाह, श्रम तथा अतिसार को नष्ट करती है और वीर्य, बल एवं पुष्टि प्रदान करती है। **भूमिजम्बू** कषाय तथा मधुर रस वाली तथा कफ एवं पित्त विकार को नष्ट करती है। यह हृदय को बल देने वाली, ग्राही, हृदय तथा कण्ठ दोषों को नष्ट करती है तथा वीर्य तथा पुष्टि को देने वाली है।

भावप्रकाश के अनुसार- जामुन ग्राही तथा रूक्ष है और कफ-पित्त-रक्त तथा दाह को जीत लेती है। **राज-जम्बू** फल स्वादिष्ट, विष्टम्भ कारक, गुरु तथा रोचक है।

राजवल्लभ के अनुसार- जामुन का फल गुरु, विष्टम्भकारक, कषाय तथा स्वादिष्ट एवं शीतल है। यह जाठराग्नि को दूषित करने वाली, रूक्ष, वात कारक तथा कफ पित्त को दूर करने वाली है।

द्रव्यगुण रत्नाकर के अनुसार- जामुन का फल वात कारक, ग्राही, रूक्ष तथा पित्त विकार एवं कफ विकार का नाशक है।

वृहन्निघण्टु रत्नाकर के अनुसार- जामुन की मज्जा कषाय रस वाली तथा ग्राही है और विशेषकर मधुमेह का नाश करने वाली है।

वैद्यक शास्त्र में जामुन का प्रयोग-

(१) **अग्र ग्रन्थों में जामुन-** जामुन का फल वात बढ़ाने वालो में प्रथम है। (च.सू.अ.२५)। (२) **व्रण रोपणार्थ जम्बू फल का प्रयोग-** लोध, जामून तथा कायफल के छाल का चूर्ण अवचूर्ण करने से शीघ्र ही व्रण में त्वचा को उत्पन्न करता है। (च.चि.अ.१३)। (३) **पित्तज वमन में जामुन के पल्लव का प्रयोग-** जामुन तथा आम के पल्लव का कषाय पित्तज वमन में शीतल कर तथा शहद मिलाकर पान करे। (च.चि.अ. २३)।

(१) **अतिसार में रक्तस्राव को दूर करने के लिए जामुन के छाल का प्रयोग-** शल्लकी, वैर तथा जामुन के छाल का चूर्ण दूध तथा मधु मिलाकर पान करने से, अलग-अलग पान करने से अतिसार रोग में रक्तस्राव को रोकता है। (चक्र.अतिसार चि.)। (२) **बालग्रहणी में जम्बू छाल का प्रयोग-** जामुन की छाल का चूर्ण समान भाग बकरी का दूध मिलाकर पान करने से बालकों का ग्रहणी रोग शान्त होता है। (चक्र. वालरोग चि.)।

Constituents—The seed contains jambulin a glucoside; also a trace of essential oil, chlorophyll, fat, resin, gallic acid, albumen etc. The bark contains tannin 12 p.c. and a kino-like gum.

Actions and uses—The juice of the ripe fruit or syrup is stomachic, astringent, and diuretic acid given in scanty urine. The decoction of bark is astringent and used in diarrhoea of children, in chronic dysentery, as a gargle mixed with Dhumaso for the relief of spongy gums, and sore, cracked or irritable tongue. A paste of the leaves is used to promote healthy discharges from indolent sores or from unhealthy ulcers. The extract of the powdered seeds and dried fruits is used in diabetes. It checks diastatic conversion of starch into sugar in cases depending on increased production of glucose. (*Materia Medica of India*—R. N. Khory, Part II., p. 269).

जम्बीर:

Citrus Acida

जम्बीर:, महाजम्बीर:, लिम्पाक:–*Citrus acida.* अन्वर्थसंज्ञा– "दन्तहर्षण:"। मातुलुङ्ग:, बीजपूर:–*Citrus medica.* नागरङ्ग:–*C. aurantium.* मधुकर्कटिका–*C. decumana.* मिष्टनिम्बू:–*C. nobilis.* अन्वर्थसंज्ञा मातुलुङ्गस्य–"गन्धकुसुम:", "दन्तुरत्वच:", "वराम्ल:", "केसराम्ल:", "कृमिघ्न:", "रोचनफल:"। जम्बीरभेदा: धन्वन्तरीयनिघण्टूक्ता:–(१) जम्बीर:, (२) मधुजम्बीर:, (३) नारङ्ग:, (४) बीजपुर: (मातुलुङ्ग:), (५) मधुकर्कटी॥ राजनिघण्टूक्ता:–(१) जम्बीर:, (२) मधुजम्बीर:, (३) निम्बूक:, (४) नारङ्ग:, (५) बीजपुर:, (मातुलुङ्ग:), (६) मधुकर्कटी, (७) वनबीजपूरक:॥ भावप्रकाशोक्ता:–(१) निम्बू:, (२) मिष्टनिम्बू:, (३) बीजपुर: (मातुलुङ्ग:), (४) मधुकर्कटिका, (५) जम्बीरद्वयम्॥ राजवल्लभोक्ता:–(१) मातुलुङ्ग:, (२) जम्बीर:, (३) मधुकर्कटिका, (४) नागरङ्ग:॥ तृष्णाशूलकफोत्क्लेशच्छर्दिश्वासनिवारण:। वातश्लेष्मविबन्धघ्नं 'जम्बीरं' गुरु पित्तलम्॥ अम्लं समधुरं हृद्यं विषदं भक्तरोचनम्। वातघ्नं दुर्जरं प्रोक्तं 'नागरङ्गफलं' गुरु॥ श्वासकासारुचिहरं तृष्णाघ्नं कण्टशोधनम्। लघूष्णं दीपनं हृद्यं 'मातुलुङ्ग'मुदाहृतम् ॥ 'त्वक्' तिक्ता दुर्जरा तस्य वातकृमिकफापहा। स्वादु शीतं गुरु स्निग्धं 'मांसं' मारुतपित्तजित्॥ मेध्यं

शूलार्तिछर्दिघ्नं कफारोचकनाशनम्। दीपनं लघु सङ्ग्राहि गुल्मार्शोघ्नं तु 'केसरम्'॥ पित्तमारुतकृद्बल्यं पित्तलं 'बद्धकेसरम्'। हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम्॥ शूलाजीर्णविबन्धेषु मन्दाग्नी कफमारुते। अपचीश्वासकासेषु 'रसंस्तस्योपयुज्यते॥ 'रसो'ऽति मधुरो हृद्यो वीर्यपित्तनिलापहः। कफकृद्दुर्जरा पाके 'मातुलुङ्गजटा' कटुः॥ 'मूल'ञ्चैव क्रिमीन् हन्ति 'पुष्पबीजञ्च' गुल्मजित्॥ अन्यच्च–चेतोहारी 'रसेन' प्रथयति कटुतामम्लताञ्चापि धत्ते। हृद्रोगोदानगुल्मश्वसनकफहरः प्लीहकोपापहन्ता। 'वीर्यादर्शांसि कासग्रहणीमपहरत्यग्निकृत् पाचनोऽयम्। सन्धत्ते रक्तपित्तं 'परिणतिसमये' केसरो मातुलुङ्ग्याः॥ 'मधुकर्कटिका' स्वादुः शीता पित्तास्रजिद् गुरुः। एषा त्रिदोषजिद् वृष्या रुचिकृच्चैव दुर्जरा। धन्वन्तरीयनिघण्टुः॥ मधुरो 'मधुजम्बीरो' शिशिरः कफपित्तजित्। अर्शोघ्नस्तर्पणो वृष्यः श्रमघ्नः पुष्टिकारकः॥ धन्वन्तरीयनिघण्टू राजनिघण्टूश्च॥ जम्बीरस्य 'फलं' रसेऽम्लमधुरं वातापहं पित्तकृत्। पथ्यं पाचनरोचनं बलकरं वह्नेर्विवृद्धिप्रदम्। 'पक्वं' चेन्मधुरं कफार्त्तिशमनं पित्तास्त्रदोषापनुत्। वर्ण्यं वीर्यविवर्द्धनं च रुचिकृत् पुष्टिप्रदं तर्पणम्॥ निम्बूफलं प्रथितमम्लरसं कटूष्णं गुल्मामवातहरमग्निविवृद्धिकारि। चक्षुष्वमेतदथ कासकफार्त्तिकण्ठ-विच्छर्दिहारि परिपक्वमतीव रुच्यम्॥ 'नारङ्गं' मधुरञ्चाम्लं गुरूष्णं चैव रोचनम्। वातामकृमिशूलघ्नं श्रमहृद्बलरुच्यकम्॥ 'बीजपूरफल'मम्लकटूष्णं श्वासकासशमनं पाचनञ्च। कण्ठशोधनपरं लघु हृद्यं दीपनं च रुचिकृत् पाचनञ्च॥ तथाच–'बालं' पित्तमरुत्कफास्त्रकरणं 'मध्यञ्च' तादृग्विधम्। 'पक्वं' वर्णकरञ्च हृद्यमथ तत् पुष्णाति पुष्टिं बलम्। शूलाजीर्णविबन्धमारुतकफश्वासार्त्तिमन्दाग्निजित्। कासारोचकशोकशान्तिदमिदं स्यान्मातुलिङ्गं सदा॥ अन्यच्च–'त्वक्' तिक्ता दुर्जरा स्यात् कृमिकफपवनध्वंसिनी स्निग्धमुष्णम्। 'मध्यं' शूलार्त्तिपित्तप्रशमनमखिलारोचकघ्नञ्च गौल्यम्। वातार्त्तिघ्नं कटूष्णं जठरगदहरं 'केसरं' दीप्यमम्लं 'बीजं' तिक्तं कफार्शःश्वयथुशमकरं बीजपूरस्य पथ्यम्॥ 'मधुकर्कटी' मधुरा शिशिरा दाहनाशिनी। त्रिदोषशमनी रुच्या वृष्या च गुरुदुर्जरा॥ अम्लः कटूष्णो 'वनबीजपुरो' रुचिप्रदो वातविनाशनश्च। स्यादम्लदोषः कृमिनाशकारी कफापहः श्वासनिषूदनश्च॥ राजनिघण्टुः॥ निम्बूकं कृमिसमूहनाशनं तीक्ष्णमम्लमुदरग्रहापहम्। वातपित्तकफशूलिने हितं कष्टनष्टरुचिरोचनं परम्॥ त्रिदोषवह्निक्षयवातरोगनिपीडितानां विषविह्वलानाम्। मन्दानले बद्धगुदे प्रदेयं विसूचीकायां मुनयो वदन्ति॥ 'मिष्टनिम्बूफलं' स्वादु गुरुमारुतपित्तनुत्। गररोगविषध्वंसि कफोत्क्लेशि च रक्तहृत्॥ शोषारुचितृषाच्छर्दिहरं बल्यञ्च वृंहणम्॥ 'बीजपूरफलं' स्वादु रसेऽम्लं दीपनं लघु। रक्तपित्तहरं कण्ठजिह्वाहृदयशोधनम्॥ श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम्॥ 'मधुकर्कटिका' स्वाद्वी रोचनी शीतला गुरुः। रक्तपित्तक्षयश्वासकासहिक्काश्रमापहा॥ 'जम्बीर'-मुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत्। शूलकासकफोत्क्लेशच्छर्दितृष्णामदोषजित्॥ आस्यवैरस्य-हृत्पीडावह्निमान्द्यक्रिमीन् हरेत्। 'स्वल्पजम्बीरिका' तद्वत् तृष्णाछर्दिनिवारणी॥ भावप्रकाशः॥ मातुलुङ्गफलं हृद्यमम्लं लघ्वग्निदीपनम्। श्वासकासारुचिहरं तृष्णाघ्नं कण्ठशोधनम्॥ विबद्धे चैव हिक्कायां शूले छर्द्याञ्च शस्यते॥ 'लिम्पाकं' सुरभि स्वादु नात्यम्लं भक्तरोचकम्। वातश्लेष्महरं हृद्यं छर्दिघ्नं नातिपित्तकृत्॥ जम्बीरं मधुरं किञ्चिदत्यम्लं पित्तकृद् गुरु। सुगन्धि दुर्जरं वह्निकफवातविबन्धनुत्॥ 'मधुकर्कटिका' शीता श्लेष्मास्यस्य प्रसादनी। रुच्या स्वादुर्गुरुः स्निग्धा वातपित्तविनाशिनी॥

'नागरङ्ग'न्तु सुरभि विपाके दुर्जरं गुरु। नात्यम्लमीषन्मधुरं वृष्यं वातविनाशनम्॥ राजवल्लभः॥

वैद्यके व्यवहारः– (१) गुल्मानाहयोः मातुलुङ्गमूलम्–"चूर्णानि मातुलुङ्गस्य भावितस्य रसेन वा। कुर्याद्वर्त्तीः सगुडिका गुल्मानाहार्त्तिशान्तये।" (चि. ५ अ.)। (२) पित्तं स्वमाशयमाननाय मातुलुङ्गरसः–"मातुलुङ्गरसं क्षौद्रं पिप्पलीमरिचान्वितम्। सनागरं पिबेत् पित्तं तथास्यैति स्वमाशयम्॥" (चि. २१ अ.)। चरकः॥ ज्वरकृते आस्यवैरस्ये मातुलुङ्गकेसरम्–"केसरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्। वैरस्ये धारयेत् कल्कं...॥" (उ. ३९ अ.)। (२) रक्तपित्ते मातुलुङ्गपुष्पमूले–"मूलानि पुष्पाणि च मातुलुङ्ग्याः पिष्ट्वा पिबेत् तण्डुलधावनेन"। (उ. ४७ अ.)। सुश्रुतः॥ कर्णशूले मातुलुङ्गरसः–"रसेन बीजपुरस्य... पूरयेत्"। (उ. १८ अ.)। वाग्भटः॥ (१) पित्तज्वरिणः पिपासायां मातुलुङ्गकेसरम्–"केसरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्। पेष्यमानं तालुलेपः सद्यः पित्ततृषापहः॥" (चि. २ अ.)। (२) तालुशोषे मातुलुङ्गकेसरम्–"केसरं मातुलुङ्गस्य पिष्टं तण्डूलवारिणा। प्रतप्तं मधुना तालुलेपः शोषापहः परः॥" (चि. १४ अ.)। (३) शर्कराय मातुलुङ्गमूलम्–"यो मातुलुङ्गिकामूलं पिबेत् पर्युषिताम्बुना। तस्यान्तः शर्करोद्भूतं दुःखं सद्यो विलीयते॥" (चि. २९ अ.)। (४) वातविसर्पे मातुलुङ्गरसः–"मातुलुङ्गरसेनापि धावनं वातसर्पिषु"। (चि. ३३ अ.)। (५) पित्तजे शिरोरोगे मातुलुङ्गकेसरम्–"केसरैर्मातुलुङ्गश्च पित्तजे शीतलेपनम्"। (चि. ३९ अ.)। (६) गुर्विणीनामरुचौ मातुलुङ्गकेसरम्–"...सकटुकं मातुलुङ्गस्य केसरम्। मार्जनं दन्तजिह्वासु गण्डूषश्चोष्णवारिणा॥ गुर्विणीनाञ्च सर्वासामरुचिञ्च नियच्छति।" (चि.५० अ.)। हारीतः॥ (१) ज्वरिणः अरुचौ मातुलुङ्गकेसरम्–"अरुचौ मातुलुङ्गस्य केसरं साज्यसैन्धवम्। ...आस्येन धारयेत्॥" (ज्वर-चि.)। (२) वातभवे शूले बीजपूरकमूलम्–"बीजपूरकमूलञ्च घृतेन सह पाययेत्। जायेद् वातभवं शूलं कर्षमेकं प्रमाणतः॥" (शूल-चि.)। (३) पार्श्वहृद्वस्तिशूले मातुलुङ्ग-रसः–"मातुलुङ्गरसो वापि...। सक्षारो मधुना पीतः पार्श्वहृद्वस्तिशूलनुत्॥" (शूल-चि.)। (४) अम्लपित्ते जम्बीररसः–"जम्बीरस्वरसः पीतः सायं हन्त्यम्लपित्तकम्" (अम्लपित्त-चि.)। (५) मसूरिकापाचनार्थं मातुलुङ्गकेसरम्–"सौवीरेण तु सम्पिष्टं मातुलुङ्गस्य केसरम्। प्रलेपात् पाचयत्याशु दाहञ्चाशु नियच्छति॥" (मसूरिका-चि.)। चक्रदत्तः॥ (१) घृतस्य परिपाकाय जम्बीररसः–"घृतस्य परिपाकाय जम्बीरस्य रसो हितः।" (अजीर्ण-चि.)। (२) हिक्कासु मातुलुङ्गरसः–"मधुसौवर्चलोपेतं मातुलुङ्गरसं पिबेत्।" (हिक्का-चि.)। भावप्रकाशः॥ (१) वमने मातुलुङ्गरसः–"मातुलुङ्गरसो लाजाशर्करामधुसंयुतः। पिप्पलीचूर्णसंयुक्तः श्रेष्ठ-श्छर्दिनिवारणः॥" (छर्दि-चि.)। (२) कृमिदन्तरुजायां बीजपूरकमूलम्–"बीजपूरकमूलस्य वाकूचीनां तथैव च। भागाभ्यां तु समं कृत्वा पिष्ट्वा वर्त्तिन्तु कारयेत्॥ एषा रदस्थवर्त्तिस्तु दन्तैर्दन्तैर्निपीडयेत्। सद्योऽवस्थितमात्रा तु कृमिदन्तरुजापहा॥" (मुखरोग-चि.)। वङ्गसेनः॥

विविध भाषाओं में नाम– सं.- जम्बीरः, दन्तशंठः, जम्भः, जम्भीरः-जम्भलः, जम्भदः, मातुलुङ्ग। सं.- फलपूरः, बीजपुरः, रुचकः, मातुलुङ्गकः। हि.- बिजौरा नीबु, मातुलुङ्ग। बं.- लेबू, टावालेबू।

जम्बीर आदिकी अन्वर्थ ज्ञापिका संज्ञा– जम्बीरः–दन्तहर्षणः। **मातुलुङ्गः**– गन्धकुसुमः, दन्तूरत्वचः, वराम्लः, केसराम्लः, क्रिमिघ्नः, रोचनफलः। **धन्वन्तरि निघण्टु के अनुसार कहे गये जम्बीरादि के नाम–** १. जम्बीरः। २. मधुजम्बीरः। ३. नारङ्गः। ४. बीजपूरः (मातुलुङ्गः)। ५. मधुकर्कटी। **राजनिघण्टु के अनुसार–**

१. जम्बीर। २. मधुजम्बीरः। ३. निम्बूकः। ४. नारङ्गः। ५. बीजपूरः (मातूलुङ्ग)। ६. मधुकर्कटी। ७. बनवीजपूरकः। **भावप्रकाश के अनुसार–** १. निम्बुः। २. मिष्टनिम्बुः। ३. बीजपूरः (मातुलुङ्गः)। ४. मधुकर्कटिका। ५. जम्बीरद्वयम्। **राजवल्लभ के अनुसार–** १. मातुलुङ्गः। २. जम्बीरः। ३. मधुकर्कटिका। ४. नारङ्गः।

गुण-दोष–

धन्वन्तरि निघण्टु के अनुसार– जम्बीर का गुण– जम्बीरी नीम्बू प्यास, शूल, कफ विकार, उत्क्लेश, वमन तथा श्वास को दूर करता है और वात विकार, कफ विकार एवं विबन्ध को नष्ट करता है तथा गुरु एवं पित्त कारक है। **नारङ्ग का फल** अम्ल रस प्रधान, मधुर पाकी, हृदय को बल देने वाला, विकार, प्यास नाशक तथा भोजन में रुचि बढ़ाने वाला है। यह वात नाशक है, दुष्पच है तथा गुरु है। मातुलुङ्ग श्वास, कास तथा अरुचि नाशक, तृष्णा नाशक तथा कफ शोधक है। यह हल्का है, उष्ण है, जाठराग्नि दीपक है तथा हृदय को बल देने वाला है। **मातुलुङ्ग की त्वचा** तिक्त रस प्रधान तथा दुर्जर और वात विकार क्रिमि रोग तथा कफ विकार को दूर करती है। यह स्वादिष्ट, शीतल, भारी, स्निग्ध है और इसका मसल्स (मांस) भाग वात तथा पित्त को दूर करने वाला है। **मातुलुङ्ग का केशर** मेधा को बढ़ाने वाला, शूल, पीड़ा तथा वमन का नाश करने वाला तथा कफ विकार एवं अरोचक का नाश करने वाला है। यह जाठराग्नि दीपक, लघु तथा ग्राही है और गुल्मरोग एवं अर्शरोग का नाश करता है। **मातुलुङ्गबद्ध केशर** पित्त विकार तथा वात विकार को बढ़ाने वाला है, पित्त वर्द्धक है, हृदय को बल देने वाला, वर्णकारक, रुचिकारक, तथा रक्त, मांस एवं बल को बढ़ाने वाला है। **मातुलुङ्ग का रस-** मातुलुङ्ग के रस का प्रयोग शूल, अजीर्ण, विबन्ध, मन्दाग्नि, कफ विकार वात विकार, अपची, श्वास रोग तथा काश रोग में होता है। इसका रस अधिक मधुर, हृदय को बल देने वाला, वीर्य, पित्त विकार तथा वात विकार का नाश करने वाला है। **मातुलुङ्ग की जटा** कफ कारक, पाक में दुष्पच तथा कटु रस प्रधान है। **मातुलुङ्ग का मूल** क्रिमि रोग का नाश करता है। उसका पुष्प तथा बीज गुल्म रोग को दूर करता है।

अन्यत्र भी कहा गया है- मातुलुङ्ग चित्त का हरण करने वाला है, रस में कटु प्रतीत होता है, अम्लता को भी बढ़ाता है। यह हृदय रोग, उदान वायु, गुल्मरोग, श्वास रोग तथा कफ विकार को दूर करता है और प्लीह के प्रकोप का नाश करता है; वीर्य, अर्श विकार, कास तथा ग्रहणी को दूर करता है, जाठराग्नि को बढ़ाता है तथा पाचन है। मातुलुङ्ग का केशर पाक के समय में रक्त पित्त को बढ़ाता है। **मधुकर्कटिका** स्वादिष्ट तथा शीतल है और रक्त पित्त को दूर करता है तथा गुरु है। यह तीनों दोषों को शान्त करने वाली, वीर्यवर्द्धक, रुचिकारक एवं दुष्पच है।

धन्वन्तरि निघण्टु तथा राज निघण्टु के अनुसार- मधुजम्बीर मधुर तथा शीतल है और कफ विकार एवं पित्त विकार को दूर करता है। यह अर्श रोग का नाश करता है, तृप्ति कारक है, वीर्य वर्द्धक है, श्रम नाशक है तथा बलकारक है।

राजनिघण्टु के अनुसार- जम्बीरी नींबू का फल रस में अम्ल है तथा मधुर है। यह वातनाशक है तथा पित्त कारक है; पथ्य है, पाचक है, रुचि कारक है, बल वर्द्धक है तथा जाठराग्नि को बढ़ाने वाला है। **पका हुआ जम्बीर का फल** मधुर होता है, कफ तथा पीड़ा को शान्त करने वाला है और रक्त पित्त के दोष को दूर करता है। यह वर्णकारक है, वीर्य वर्द्धक है, रुचिकारक है, पुष्टिकारक है तथा तृप्ति कारक है। **निम्बू का फल** अम्ल रस वाला, कटु तथा उष्ण होता है और यह गुल्म तथा आम वात को दूर करता है तथा जाठराग्नि

को बढ़ाने वाला है। यह नेत्र के लिए हितकर है और कास कफ विकार एवं कण्ठ रोग को नष्ट करता है। **पका हुआ निम्बू** अधिक रुचिकारक होता है। नारङ्ग (नारङ्गी) मधुर, अम्ल रस वाला, गुरु तथा उष्ण है और रुचि कारक है; इनके अतिरिक्त आमवात, क्रिमि रोग तथा शूल का नाश करता है, श्रम को दूर करता है तथा बल वर्द्धक एवं रुचि कारक है। **बीजपूर का फल** अम्ल रस, कटु तथा उष्ण है ओर यह श्वास-कास को शान्त करने वाला एवं पाचक है। कण्ठ को शुद्ध करने वाला है, लघु है, हृदय को बल देने वाला है, जाठराग्नि दीपक, रुचिकारक तथा पाचक है। और भी इसके गुण हैं- **बाल निम्बू फल** पित्त विकार, वात विकार तथा रक्त पित्त को बढ़ाने वाला है। **नीम्बू का मध्य भाग** पूर्वोक्त गुण से युक्त होता है। **पका हुआ नीम्बू** वर्णकारक, हृदय को बल देने वाला है और पुष्टि तथा बल को पुष्ट करता है। यह शूल, अजीर्ण, विबन्ध, वात विकार, कफ विकार, पीड़ा तथा मन्दाग्नि को शीघ्र ही दूर करता है। मातुलुंग हमेशा कास, अरोचक तथा शक्ति को देता है। और भी- **नारङ्गी का छिलका** तिक्त रस प्रधान तथा दुष्पच होता है। यह क्रिमि रोग, कफ विकार तथा वात विकार का नाश करने वाली है, स्निग्ध है तथा उष्ण है। **नारंगी का मध्य भाग** शूल, पीड़ा तथा पित्त को शान्त करने वाला, सम्पूर्ण अरोचक का नाश करने वाला तथा गले के लिए हितकर है। **नारंगी का केशर** वात विकार का नाश करने वाला, कटु रस प्रधान तथा उष्ण है; उदर विकार को दूर करने वाला तथा जाठराग्नि दीपक है। **नारंगी का बीज** तिक्त रस वाला है तथा कफ विकार, अर्श रोग एवं शोथ को शान्त करने वाला है। बीजपुर का बीज पथ्य है। **मधु कर्कटी** मधुर तथा शीतल है और दाह को शान्त करने वाली है, त्रिदोष शामक है, रुचि कारक है, वीर्य वर्द्धक है, गुरु तथा दुर्जर है। वन बीजपुर रुचिप्रद तथा वातनाशक है और अम्ल रोग एवं क्रिमि नाशकारक है, कफ नाशक है तथा श्वास को दूर करने वाला है।

भावप्रकाश के अनुसार- नीम्बू क्रिमि समूह का नाश करने वाला, तीक्ष्ण है, अम्ल रस वाला है तथा उदर रोग एवं ग्रह वाधा को दूर करने वाला है, वात विकार, कफ विकार तथा शूल के रोगियों के लिए हितकर है, कष्ट से नष्ट रुचि को बढ़ाने वाला है। यह त्रिदोष, मन्दाग्नि तथा वातरोग से पीड़ित व्यक्तियों के लिए और विष विकार से विकल लोगों के लिए मन्दाग्नि, विबन्ध तथा विसूचिका रोग में प्रयोग करे, ऐसे मुनियों ने कहा है। **मीठा नींबू** फल स्वादिष्ट तथा गुरु है और वात-पित्त को दूर करता है; गर रोग तथा विष विकार का नाश करने वाला, कफ को बढ़ाने वाला तथा रक्त विकार को दूर करता है। यह शोष, अरुचि, प्यास तथा वमन को दूर करता है, बल कारक है एवं श्वास वर्द्धक है। **बिजौरा निम्बू का फल** स्वादिष्ट, रस में अम्ल है तथा दीपक एवं लघु है। यह रक्त पित्त को दूर करता है, कण्ठ, जिह्वा तथा हृदय को शुद्ध करता है। यह श्वास, कास तथा अरुचि को दूर करता है, हृदय को बल देता है और प्यास को शान्त करता है। मधुकर्कटिका स्वादिष्ट, रुचि कारक, शीतल तथा गुरु है। यह रक्त-पित्त, क्षय रोग, श्वास, कास, हिक्का तथा थकावट को दूर करता है। **जम्बीरी नीबू** उष्ण, गुरु तथा अम्ल रस है और वात विकार, कफ विकार एवं विबन्ध को दूर करता है। यह शूल, कास, कफ निकलना, वमन, प्यास तथा आम दोष को जीत लेता है। इनके अतिरिक्त यह मुख की विरसता को, हृदयशूल, मन्दाग्नि तथा क्रिमि रोग को दूर करता है। **स्वल्प जम्बीरिका** पूर्वोक्त गुण वाली है तथा प्यास एवं वमन को दूर करने वाली है।

राजवल्लभ के अनुसार- मातुलुंग का फल हृदय को बल देने वाला, अम्ल रस प्रधान, लघु तथा अग्नि दीपक है; श्वास, कास तथा अरुचि को दूर करता है; प्यास का नाश करता है तथा कण्ठ को शुद्ध करता है। यह विबन्ध में, हिक्का में, शूल में तथा वमन में प्रशस्त है। **लिम्पाक** सुगन्धि तथा स्वादिष्ट है तथा यह अधिक अम्ल नहीं है और भोजन में रुचि कारक है। यह वात-कफ विकार का नाश करने वाला, हृदय को

बल देने वाला, वमन का नाश करने वाला तथा अधिक पित्त कारक नहीं है। **जम्बीर** मधुर, थोड़ा अम्ल है तथा पित्त कारक एवं गुरु है। यह सुगन्धित, दुष्पच, तथा मन्दाग्नि, कफ विकार, वात विकार एवं विबन्ध को दूर करता है। **मधुकर्कटिका** शीतल है और कफ तथा मुख को प्रसन्न करने वाली है, रुचिकारक है, स्वादिष्ट है, गुरु है, स्निग्ध है तथा वात पित्त का नाश करने वाली है। **नारङ्गी** सुगन्धित, विपाक में दुष्पच तथा गुरु है। यह अधिक अम्ल नहीं है, थोड़ा मधुर है, वीर्य वर्द्धक है तथा वातनाशक है।

वैद्यक शास्त्र में मातुलुङ्ग का प्रयोग– (१) गुल्म तथा आनाह रोग में मातुलुङ्ग के मूल का प्रयोग- मातुलुङ्ग के मूल के चूर्ण को मातुलुङ्ग के रस में भावित कर तथा गुड़ मिलाकर वर्ति बनावे। यह वर्ति गुल्म, आनाह तथा पीड़ा को नष्ट करती है। (च.चि.अ.५)। (२) **पित्त को पित्ताशय में लाने के लिए मातुलुङ्ग के रस का प्रयोग-** मातुलुंग का रस शहद, पीपर तथा मरिच का चूर्ण तथा सोंठ का चूर्ण मिलाकर पान करे। यह पित्त को पिताशय में ले जाता है। (च.चि.अ.२१)।

(१) ज्वरजन्य मुख की विरसता में मातुलुङ्ग के केशर का प्रयोग- मुख की विरसता में मातुलुंग के केशर को मधु तथा सेन्धा नमक मिलाकर उसके कल्क का मुख में धारण करे। (सु.उ.अ.३९)। (२) **रक्त पित्त में मातुलुंग के पुष्प तथा मूल का प्रयोग-** मातुलुङ्ग के मूल तथा पुष्प को पीसकर चावल के धोअन के साथ पान करे। (सु.सू.अ.९)।

मातुलुंग के रस का प्रयोग- विजौरा नीम्बू के रस को कर्ण शूल में कान में छोड़े। (वाग्भट, उ.अ.१८)।

(१) पित्तज्वर के रोगी के पिपासा में मातुलुंग के केशर का प्रयोग- मातुलुंग के केशर को मधु तथा सेन्धा नमक मिलाकर तथा पीस कर तालु में लेप करे। यह शीघ्र ही पैतिक तृषा शान्त करता है। (हा.चि. अ.२)। (२) **तालु शोष में मातुलुंग के केशर का प्रयोग-** मातुलुंग के केशर को चावल के धोअन के साथ पीसकर गरम कर तथा मधु मिलाकर तालु में लेप करे। यह तालु शोष को दूर करता है। (हा.चि.अ.१४)। (३) **शर्करा रोग में मातुलुंग के मूल का प्रयोग-** जो मनुष्य मातुलुंग के मूल का चूर्ण वासी जल से पान करता है उसके अन्दर की शर्करा जन्य दुःख शीघ्र ही नष्ट होता है (हा.चि.अ.२९)। (४) **वात विसर्प में मातुलंग के रस का प्रयोग-** वात विसर्प में मातुलुंग के रस से प्रक्षालन करे। (हा.चि.अ.३३) (५) **पित्तज शिरो रोग में मातुलुंग के केशर का प्रयोग-** मातुलुंग के केशर को पित्तज शिरो रोग में शीतल कर लेप करे। (हा.चि. अ.३९)। (६) **गुर्विणी (गर्भवती) स्त्रियों के अरुचि में मातुलुंग केशर का प्रयोग-** मातुलुंग के केशर मरिच का चूर्ण मिलाकर दन्त तथा जिह्वा में मार्जन करने से तथा गरम जल के साथ गण्डूष धारण करने से गर्भिणी के सभी प्रकार के अरुचि को दूर करता है। (हा.चि.अ.५०)।

(१) ज्वर रोगी के अरुचि में मातुलुंग के केशर का प्रयोग- मातुलुंग के केशर को घी तथा सेन्धा नमक मिलाकर ज्वर रोगी के अरुचि में मुख में धारण करे। (चक्र.ज्वर चि.)। (२) **वातजन्य शूल में बीजपूर के मूल का प्रयोग-** बिजौरा नींबू के मूल को घृत के साथ एक कर्ष की मात्रा में पान कराये। यह वातजन्य शूल को दूर करता है। (चक्र.शूल–चि.)। (३) **पार्श्व हृदय तथा वस्ति शूल में मातुलुंग के रस का प्रयोग-** मातुलुंग का रस क्षार मिलाकर मधु के साथ पान करे। यह पार्श्व शूल, हृदय शूल तथा वस्ति शूल को नष्ट करता है। (चक्र.शूल चि.)। (४) **अम्ल पित्त में जम्बीर रस का प्रयोग-** सायंकाल जम्बीर का रस पान करने से अम्ल पित्त को दूर करता है। (चक्र.अम्लपित्त चि.)। (५) **मसूरिका के पाक के लिए मातुलुंग के केशर का प्रयोग-** मातुलुंग का केशर सौवीर के साथ पीसकर लेप करने से मसुरिका का शीघ्र ही पाक करता है तथा दाह का नाश करता है। (चक्र.मसू.चि.)।

(१) घृत के परिपाक के लिए जम्बीरी नीम्बू के रस का प्रयोग- घृतजन्य अजीर्ण की शान्ति के लिए जम्बीरी नीम्बू के रस का प्रयोग हितकर होता है। (भाव.अजीर्ण चि.) **(२) हिक्का में मातुलुंग के रस का प्रयोग-** हिक्का रोग में मातुलुंग के रस में मधु तथा सौवर्चल नमक मिलाकर पान करे। (भाव.हिक्का चि.)।

(१) वमन में मातुलुंग के रस का प्रयोग- मातुलुंग का रस, धान का लावा, शक्कर तथा मधु मिलाकर और पीपर का चूर्ण मिलाकर पान करना वमन दूर करने में श्रेष्ठ है। (वंग. छर्दि चि.)। **(२) क्रिमि दन्त रोग की पीड़ा में बीजपूर के मूल का प्रयोग-** बिजोरा नीम्बू का मूल तथा वाकुची का मूल सम भाग दोनों को पीस कर वर्ति बनावे और इस वर्ति को दांत पर रखकर दांत से चबाये। यह उचित मात्रा में दांत से दांत पर दबाने से दन्त क्रिमि को दूर करता है। (वंगसेन, मुखरोग चि.)।

Constituents of *C. medica*—Lemon juice contains citric acid 7 to 10 p.c., phosphoric and malic acids; also citrates of potassium and other bases; sugar mucilage and ash. Dose 4 to 6 drs. Lemon peel contains a volatile oil, hesperidin, a bitter crystaliine glucoside chiefly in the white of the rind; and ash 4 p.c. Hesperidin a bitter principle 5 to 8 p.c. in yellow crystals, sparringly soluble in boiling water and ether, readily soluble in hot acetic acid, also in alkaline solutions.

Actions and uses—The juice, rind of the fruits and volatile oil are used in medicine. The peel is bitter tonic and stomachic, used for favouring tinctures and infusions. It is also stimulant and carminative given in indigestion, flatulence, and as a corrective to purgatives. It is also extensively used to disguise the taste of medicines such as quinine, & c. The lemon juice is refrigerant, cooling and antiscorbutic, analogous to orange juice, but it contains more citric acid, less syrup, and hence called acid of lemons. The juice taken internally enters the blood as alkaline citrates, potassium salts and phosphoric acid. The citrates are partly oxidized into carbonic acid and water. The potassium salts and phosphoric acid act upon the red corpuscles. They precipitate uric acid and thus promote the formation of calculi. If long continued the juice or citric acid impairs digestion and impoverishes the blood. It is supposed to dissolve organic matters in the system; hence used in the treatment of atheroma. The fresh juice is useful in scarvy. It is an ingredient in many refrigerant and diuretic effervescing drinks, used allaying febrile heat and thirst in saponing restlessness, promoting the action of the skin and kidneys. It is given in inflamatory affections and in Dyspepsia with vomiting. Its power of conveying alkalies into the blood renders it useful in acute Rheumatic affections, Sciatica, Lumbago, & c., also given in obesity in large quantities with good results. It is often used with potassium bicarbonate and honey by the natives as a gargle in Diphtheria and sore throat. Externally it relieves itching if applied in sun-burn, and to check post partem haemorrhage. The essential oil is a stimulating liniment for the relief of Rheumatic pains. The juice of baked lemon is used in bilious affections and to stop diarrhoea. (*Materia Medica of India*—R. N. Khory, Part II., pp. 125-26).

जवा

Hibiscus Rosa Sinensis

जवा (पा)—*Hibiscus rosa sinensis, Shoe-flower.* **जातिः**—*Jasminum grandiflorum. Spanish Jasmine, Chambeli.*

अन्वर्थसंज्ञा–जवाया:–"ओड्रपुष्पम्" ("आ ईषदुनत्ति, उन्दी क्लेदने, ओडं पुष्पमस्य"), "रक्तपुष्पी", "अर्कप्रिया", "हरिवल्लभा", "सूर्याराधनसाधनी"। जवा तु कटुरुष्णास्या-दिन्द्रलुप्तकनाशकृत्। विच्छर्दिजन्तुजननी सूर्याराधनसाधनी॥" राजनिघण्टु:॥ जवा सङ्ग्राहिणी केश्या...। 'जातियुगं' (जाति: स्वर्णजातिश्च) तिक्तमुष्णं तुवरं लघु दोषजित्। शिरोऽक्षिमुखदन्तार्त्ति-विषकुष्ठानिलास्त्रजित्॥ भावप्रकाश:॥

वैद्यके व्यवहार:– (१) केशकृष्णीकरणे जवापुष्पम्–(भृङ्गराजे द्रष्टव्यम्)। (२) आर्त्तवलाभाय जवापुष्पम्–"सकाञ्जिकं जवापुष्पं... प्राश्य वनिता त्वार्त्तवं लभेत्"। (योनिव्यापत्-चि.)। चक्रदत्त:॥ (१) पूतिकर्णे जातीपत्ररस:–"जातीपत्ररसैस्तैलं विपक्वं पूतिकर्णजित्" (कर्णरोग-चि.)। (२) 'मुखपाके' जातिपत्रम्–"कार्यञ्च वहुधा नित्यं जातिपत्रस्य चर्वणम्" (मुखरोग-चि.)। भावप्रकाश:॥ सदाहमूत्रोष्ण्यवेदनाशमनार्थं जातीमूलम्–"अजाक्षीरेण सम्मिश्रं जातिमूलं प्रपेषितम्। पिबेत् सदाहमूत्रौष्ण्यवेदनाशमनं यत:॥" हारीत:॥

विविध भाषाओं में नाम–

सं.– औड्रपुष्पम्, जपा। हि.– ओढ्रहुल, आढहुल, गुड़हल, जवाकुसुम। बं.– जवाकूलरे गाछ। म.– जासवन्द। गु.– जासव। ते.– मन्दारणु। क.– पीसनला। ता.– शुष्प पुष्पु। फा.– आन्धरी विन्ध, अं.– Shoe-flower, ले.– Hibiscus rosa sinensis.

जपाकुसुम की अन्वर्थ ज्ञापिका संज्ञा– जवाया: ओढ्रपुष्पम् (आ ईषदुनत्ति, उन्दी क्लेदने ओढ्रं पुष्पमस्य), रक्तपुष्पी, अर्कप्रिया, हरिवल्लभा, सूर्याराधनसाधनी।

गुण-दोष–

राजनिघण्टु के अनुसार– जवा (जपा) कटु रस प्रधान तथा उष्ण वीर्य है। यह इन्द्रलुप्त (गञ्जा) रोग का नाश करती है। यह वमन कारक है, जन्तुओं को उत्पन्न करती है तथा सूर्य की आराधना की साधन है।

भावप्रकाश के अनुसार– जवा ग्राही है तथा केश के लिए हितकर है। दोनों प्रकार की जाति (जाति, स्वर्ण जाति) तिक्त रस प्रधान, उष्ण, कसैला तथा लघु है और यह दोषों को जीत लेती है। यह सिर रोग, अक्षि रोग, मुख रोग तथा दन्त रोग की पीड़ा को, विष विकार, कुष्ठ रोग तथा वात रक्त को दूर करती है।

वैद्यक शास्त्र में जवा का प्रयोग–

(१) केश को काला करने में जवा कुसुम का प्रयोग– भृंगराज के वर्णन में बाल काला करने की विधि जवाकुसुम की लिखी गयी हैं। **(२) आर्तवलाभ के लिए जवाकुसुम का प्रयोग–** स्त्री जवाकुसुम को खाकर आर्तव को प्राप्त करती है। (चक्र.योनिव्यापत्ति चि.)।

(१) पूतिकर्ण में जातीपत्र के रस का प्रयोग– जातीपत्र के रस के साथ पकाया हुआ तैल पूतिकर्ण को जीत लेता है। (भावप्रकाश, कर्णरोग चि.)। **(२) मुखपाक में जातीपत्र का प्रयोग–** मुखरोग में अनेक बार जातीपत्र को चबाये। (भा. मुखरोग चि.)।

दाहयुक्त उष्ण मूत्र की वेदना नाश के लिए जातीमूल का प्रयोग– जाती (चमेली) के मूल को बकरी के दूध के साथ पीस कर पान करे। यह दाह युक्त उष्ण मूत्र की वेदना को शान्त करता है। (हा.सं.)।

Actions and uses of Shoe-flower—The petals are demulcent and emollient. As a refrigerant drink its infusion is given in fevers, as a demulcent in cough and cystitis; combined with milk, sugar and cumin; it is given in gonorrhoea. In menorrhagia, combined with lotus root the bark of *Eerisdendron anfractuosum*, it is of benefit. (*Materia Medica of India*—R. N. Khory, Part II., p. 98).

Constituents *of Jasminum grandiflorum*—Resin, salicylic acid, an alkaloid—named jasminine and an astringent principle.

Actions and uses—Astringent. The juce of the leaves or the oil is dropped into the ear in otorrhoea. The leaves are chewed, or locally applied to aphthous sores or ulcers in the mouth. As uterine sedative a poultice of the leaves and flowers is applied over the genitals, pubis and loins, in painful menstruation, and in loss of venereal desire. The fresh juice of the leaves is applied to soft corns with relief. (*Materia Medica of India*—R. N. Khory, Part II., p. 435).

जया

Sesbania Aegyptiaca Pers.

जया, जयन्ती–*Sesbania aegyptiaca Pers. Aeschynomene sesban Roxb.*

अन्वर्थसंज्ञा– "सूक्ष्ममूला", "केशरुहा", "विषमोहप्रशमनी"। विषघ्नी तिक्तकटुका कफपित्तसमीरजित्। धन्वन्तरीयनिघण्टुः॥ ज्ञेया जयन्ती गलगण्डहारी (मदगन्धयुक्ता) तिक्ता कटूष्णाऽनिलनाशनी च। भूतापहा कण्ठविशोधनी च कृष्णा तु सा तत्र रसायनी स्यात्॥ राजनिघण्टुः॥ जयन्ती कफपित्तघ्नी क्रिमिशोथविषप्रणुत्। मदगन्धवती तिक्ता कटूष्णा कण्ठशोधिनी॥ भावप्रकाशः॥

वैद्यके व्यववहारः– (१) ज्वरे जयन्तीमूलम्–"मूलं जयन्त्याः शिरसा धृतं सर्वज्वरापहम्।" (ज्वर-चि.)। (२) इक्षुमेहे जयन्तीमूलम्–"पारिजातजया...। जलेक्षुमद्य... मेहान् क्रमादघ्नन्ति चाष्टौ क्वाथाः समाक्षिकाः।" (प्रमेह-चि.)। (३) मेढ्रपाके जयापत्रम्–"जयाजात्यश्वमारार्क... दलैः पृथक्। कृतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत्॥" (उपदंश-चि.)। (४) श्वित्रे श्वेतजयन्तीमूलम्–"श्वेतजयन्तीमूलं पिष्टं पीतञ्च गव्यपयसैव। श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा॥" (कुष्ठ-चि.)। (५) प्रथममघगदे दृश्यमाने जयन्तीबीजम्–"पीतं बीजं जयायाः सघृतं..." (मसूरिका-चि.)। (६) प्रतिश्याये जयन्तीपत्रम्–"पुटपक्वं जयापत्रं सिन्धुतैलसमन्वितम्। प्रतिश्यायेषु सर्वेषु शीलितं परमौषधम्॥" (नासारोग-चि.)। चक्रदत्तः॥ गर्भधारणवारणाय जयन्तीकुसुमम्–"आरणालपरिपेषितं त्र्यहं या जयाकुसुममत्ति पुष्पिनी। सह पुराणगुडमुष्टिसेविनी सन्दधाति न हि गर्भमङ्गना॥" (बन्ध्या-चि.)। भावप्रकाशः॥

विविध भाषाओं में नाम–

सं.– **जया**– जयन्ती, तर्कारी, नादेयी, वैजयन्तिका। हि.– जाही। जैन्तिगाछ। म.– शिभारी। ता.– चम्पाई। ते.– सोमान्ति। अ.– हर्–एल्ककृद। फा.– सिमिरन्। ले.– Sesbania aegyptiaca Pers.

जया, जयन्ती की अन्वर्थ ज्ञापिका संज्ञा- सूक्ष्ममूला, केशरुहा, विषमोहप्रशमनी।

गुण-दोष-

धन्वन्तरि निघण्टु के अनुसार- जया (जयन्ती) विषनाशक है। यह तिक्त तथा कटु रस वाली है और कफ-पित्त एवं वात विकार को दूर करती है।

राजनिघण्टु के अनुसार- जयन्ती मदगन्ध से युक्त गलगण्ड रोग का नाश करने वाली है। यह तिक्त तथा कटु रस वाली है तथा वात रोग का नाश करती है। यह भूत बाधा का नाश करती है, कण्ठ को शुद्ध करने वाली है और कृष्णा जयन्ती रसायन गुण वाली है।

भाव प्रकाश के अनुसार- जयन्ती कफ तथा पित्त का नाश करने वाली, क्रिमि रोग, शोथ तथा विष विकार को दूर करने वाली है। मदगन्ध वाली जयन्ती तिक्त तथा कटु रस प्रधान तथा उष्ण है और कण्ठ को शुद्ध करती है।

वैद्यक शास्त्र में जयन्ती का प्रयोग-

(१) ज्वर में जयन्ती मूल का प्रयोग- जयन्ती के मूल का सिर पर धारण करने से सभी प्रकार के ज्वर को दूर करती है। (चक्र.ज्वर चि.)। (२) **इक्षुमेह में जयन्ती मूल का प्रयोग**- पारिजात तथा जया का जलमेह, इक्षुमेह तथा मद्यमेह में मधु के साथ प्रयोग करे। यह आठ प्रकार के मेहों का नाश करता है। (चक्र.प्रमेह चि.)। **(३) मेढ्रपाक में जया पत्र का प्रयोग**- जया, जाती तथा अश्वमार (कनैल) के पत्तों से अलग-अलग बनाया क्वाथ मेढ्रपाक में प्रक्षालन करने के लिए प्रयोग करे। (चक्र.उपदंश चि.)। (४) **शिवत्र रोग में जयन्ती मूल का प्रयोग**- श्वेत जयन्ती मूल को पीस कर गाय के दूध के साथ रविवार को पान करते हैं। शिवत्र कुष्ठ को अवश्य नष्ट करता है ऐसा वैद्यनाथ जी की आज्ञा है। (चक्र.कुष्ठ चि.)। (५) **प्रथम अद्यगद (मसूरिका) के दिखाई देने पर जयली बीज का प्रयोग**- जया के बीज को पीस कर घी के साथ पान करे। (चक्र.मसूरिका चि.)। (६) **प्रतिश्याय में जयन्ती पत्र का प्रयोग**- जयन्ती पत्र के पुटपाक के द्वारा रस निकाल कर तथा उसमें सेन्धा नमक एवं तेल मिलाकर नस्य लेने से सभी प्रकार के प्रतिश्याय में परम औषध है अर्थात् अच्छी तरह लाभ करता है। (चक्र.नासारोग चि.)। **भावप्रकाश के अनुसार- गर्भधारण को रोकने के लिए जयन्ती पुष्प का प्रयोग**- आरनाल (काञ्जी) के साथ जयन्ती के पुष्प को पीस कर जो स्त्री (पुष्पिणी) तीन दिन तक पान करती है तथा पुराने गुड़ का एक मुष्टि की मात्रा में सेवन करती है वह गर्भ को नहीं धारण करती है। (भा. बन्ध्या चि.)।

Constituents—The seeds contain a fixed oil, an odorous body, resin, sugar, an organic acid, gum, proteids and ash 5 p.c.

Actions and uses—The seeds and the juice of the bark are astringent and given in diarrhoea. The leaves are used as a poultice to promote suppuration. The powdered seeds are applied to relieve the pain of the scorpion bites. (*Materia Medica of India*—R. N. Khory, Part II., p. 230).

जातिः

Myristica Fragrans

जातिफलम्–*Myristica fragrans, Nutmeg.* **जातिपत्री**–*Mace.*

अन्वर्थसंज्ञा– 'जातिफलस्य'–"मदशौण्डम्"। 'जातिपत्र्याः–"मलनाशिनी"। 'जातीफलं' कषायोष्णं कटु कण्ठामयार्त्तिजित्। वातातिसारमेहघ्नं लघु वृष्यञ्च दीपनम्॥ धन्वन्तरीयनिघण्टू राजनिघण्टुश्च॥ 'जातिपत्री' कटुका स्यात् सुरभिः कफनाशिनी। वक्त्रदौर्गन्ध्यहृद्व्रण्यर्या विषहृत् कायकान्तिदा॥ धन्वन्तरीयनिघण्टुः॥ 'जातिपत्री' कटुस्तिक्ता सुरभिः कफनाशनी। वक्त्रवैशद्यजननी जाड्यदोषनिकृन्तनी॥ राजनिघण्टुः॥ 'जातिफलं' रसे तिक्तं तीक्ष्णोष्णं रोचनं लघु। कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम्॥ निहन्ति मुखवैरस्यमलदौर्गन्ध्यकृष्णताः। क्रिमिकासवमिश्वासशोषपीनसहृद्रुजः॥ 'जातिपत्री' लघुः स्वादुः कटूष्णा रुचिवर्णकृत्। कफकास-वमिश्वासतृष्णाक्रिमिविषापहा॥ वक्त्रवैशद्यजननी तिक्ता दौर्गन्ध्यहारिणी। भावप्रकाशः॥ 'जातीफलं' तृषाछर्दिशूलघ्नं वातपित्तजित्। 'जातीपत्री' लघुस्तृष्णातोददौर्गन्ध्यजिन्मता॥ राजवल्लभः॥ 'तैलं' जातिफलोद्भूतं समुत्तेजनमग्निदम्। जीर्णातिसारशमनमाध्मानाक्षेपशूलहृत्॥ आमवातहरं बल्यं दन्तवेष्टव्रणार्त्तिनुत्। आत्रेयसंहिता॥

वैद्यके व्यवहारः–पिपासोत्क्लेशयोर्जातिफलम्–"पिपासायामथोत्क्लेशे जातिफलस्य वा शीतम्।" (अग्निमान्द्य-चि.)। चक्रदत्तः॥ व्यङ्गनीलिकायाः जातिफलम्–"जातिफलस्य लेपस्तु हरेद् व्यङ्गञ्च नीलिकाम्" (मुखरोग-चि.)। भावप्रकाशः॥ विपादिकायां जातिफलम्–"पिष्ट्वा जातीफलं लेपाद्विनिहन्ति विपादिकाम्" (कुष्ठाधिकारः) वङ्गसेनः।

विविध भाषाओं में नाम–

सं.– जातीफलम्, जातीकोषः, मालवीफलम्। हि.-ब.-म.-पं.– जायफल। गु.-क.– जाईफल। ते.– जाजीकाया। ता.– जादिकराय, जाति वकाया। ब्रह्मी– जादिक्षु। द्रा.– जादिकाई। फा.– जोजा वोया। अं.– जोग उतलीया। अं.– Nutmeg (नटमेग)। ले.– Myristica malabarica (मिरिष्टिका मालवेरिका)।

जातिपत्री–सं.– जातिपत्री, जातीफलत्वक्। हि.– जावित्री, जयित्री, जयित्रो। म.– वड़ इलाज, जौड़ी। म. क.ते.– जायपत्री। गु.– जावत्री। फा.– जावित्री। अ.– विसवासहे। अं.– Mace (मेस)। ले.– Myristica fragrans (मिरिष्टिका फ्रेगरेन्स)।

जातीफल की अन्वर्थ ज्ञापिका संज्ञा– मदशौण्डम्।

जातीपत्री की अन्वर्थ ज्ञापिका संज्ञा– मलनाशिनी।

गुण-दोष–

धन्वन्तरि निघण्टु तथा राजनिघण्टु के अनुसार– जातीफल कषाय तथा कटु रस वाला एवं उष्ण है और कण्ठ रोग की पीड़ा को दूर करता है। यह वातातिसार तथा प्रमेह को नष्ट करता है, लघु है, वीर्य वर्द्धक है तथा जाठराग्नि दीपक है।

धन्वन्तरि निघण्टु के अनुसार जाति पत्री– जावित्री कटु रस वाली है, सुगन्धित है तथा कफ का नाश करने वाली है। यह मुख के दुर्गन्ध को दूर करती है, विष नाशक है तथा शरीर कान्तियुक्त बनाती है।

राजनिघण्टु के अनुसार– जावित्री कटु तथा तिक्त रस वाली सुगन्धित है तथा कफ विकार का नाश करती है। यह मुख को स्वच्छ बनाती है तथा मुख की जड़ता को दूर करती है।

भावप्रकाश के अनुसार– जातीफल रस में तिक्त, तीक्ष्ण, उष्ण वीर्य, रोचक तथा लघु है और यह कटु

रस, जाठराग्नि दीपक, ग्राही, स्वरवर्द्धक तथा कफ विकार एवं वात विकार का नाश करती है। मुख की विरसता का नाश करता है और मल, दुर्गन्ध, कृष्णता, क्रिमिरोग, कास, वमन, श्वास, शोष तथा पीनस की पीड़ा को दूर करता है। जातीपत्री, लघु, स्वादिष्ट, कटु रस तथा उष्ण है और रुचि एवं वर्णवर्द्धक है। यह कफ, कास, वमन, श्वास, प्यास, क्रिमि रोग तथा विष विकार को दूर करती है। यह मुख को स्वच्छ बनाती है, तिक्त है तथा दुर्गन्ध को दूर करती है।

राजवल्लभ के अनुसार- जायफल प्यास, वमन तथा शूल का नाश करने वाली है तथा वात पित्त को दूर करती है। जावित्री लघु है तथा प्यास, ताप तथा दुर्गन्ध को दूर करती है।

आत्रेय संहिता के अनुसार- जायफल का तैल उत्तेजना देने वाला तथा जाठराग्नि वर्द्धक है, जीर्णातिसार को शान्त करता है; आध्मान, आक्षेप तथा शूल को दूर करता है। यह आमवात को दूर करता है, बल को बढ़ाने वाला है, तथा दन्तवेष्ट के व्रण की पीड़ा को दूर करता है।

वैद्यक शास्त्र में जातीफल का प्रयोग-

पिपासा तथा उत्क्लेश में जातीफल का प्रयोग- पिपसा तथा उत्क्लेश में जाती फल का शीत कषाय पान करायें। (चक्र.अग्निमान्द्य चि.)।

व्यङ्ग तथा नीलिका रोग में जाती फल का प्रयोग- जातीफल का लेप व्यङ्ग तथा नीलिका को नष्ट करता है। (भा.मु.चि.)।

विपादिका में जातीफल का प्रयोग- जायफल को पीसकर लेप करने से विपादिका का नाश होता है। (वंगसेन, कुष्ठाधि.)।

Constituents—The kernel contains a volatile oil, 2 to 8 p.c., a fixed oil, proteids, fat, starch, mucilage and ash; concrete oil, called oil of mace, 20 p.c. The mace contains a volatile oil (by distillation) identical with the volatile oil from the kernel, a fixed oil (by pressure), resin, fat, sugar, dextrine and mucilage.

Actions and uses—Aromatic, stomachic and stimulant. In small doses it stimulates digestion, increases appetite, relieves flatulence, dyspepsia and colic. In large doses it causes stupor and delirium. As a carminative, anodyne and astringent, it is given in diarrhoea and dysentery, to allay nausea and vomiting, small doses frequently given relieves strangury. A paste of it is used as an external application to the head in headache, palsy cramps & c. The wood is used as an astringent to check diarrhoea. The oil is stimulant and carminative, and in large doses, narcotic and is given in a tonic dyspepsia, diarrhoea and as an adjunct to other stimulant medicines. Locally diluted with bland oil, it is applied in rheumatism, paralysis, sprains &c. Butter of nutmeg is externally applied in rheumatism, contusions, sprains etc. Mace is used for the same purposes as the kernel. (*R. N. Khory—Part II., p. 524*).

जीरकत्रयम्

Cuminum Cyminum

जीरकः (कम्), अजाजी *Cuminum cyminum, Linn.*, **उपकुञ्चिका**—*Carum carui, Linn.*, **कृष्णाजाजी**—*Nigella sativa, Sibthorp., N. indica, Roxb.*

भेदाः–जीरकपञ्चकं यथा–"जीरकः" (पीताभः), "शुक्लाजाजी", "कृष्णाजाजी", "उपकुञ्चिका", "वनजीरकः"। जीरकत्रयं यथा–"जीरकः", "कृष्णाजाजी", "उपकुञ्चिका"। पूर्वाचार्यकृतवर्णनम्–"जीरकशब्देन च प्रसिद्धं महज्जीरकम्", "कारवी, ईषत्कृष्णक्षुद्रजीरकम्" (उदररोगोक्तनारायणचूर्णस्य टीकायां 'शिवदासः')। "उपकुञ्चिका, स्थूलकृष्णजीरकम्" (ग्रहण्युक्ता- यामकाञ्जिकस्य टीकायां 'शिवदासः')। जीरकानां पर्यायाः–जीरकस्य–"अजाजी"। 'कृष्णजीरकस्य'–"कृष्णाजाजी", "कारवी" (शिवदासः)। कृष्णजीरकस्य 'शाजीरा कलौजी इति ख्यातस्य'–"कालाजाजी" "कारवी", "सुषवी", "पृथ्वीका" "उपकुञ्चिका"–(राजनिघण्टु भावप्रकाशश्च)। अन्वर्थसंज्ञा–जीरकस्य–उत्पत्तिबोधिका–"मागधम्"। परिचयज्ञापिका– "पीताभम्"। गुणप्रकाशिका–"रुच्यम्", "मनोज्ञम्", "दीप्यम्"। 'शुक्लजीरकस्य'–"गौरजीरकः", "दीर्घकणा", "स्तन्या", "दीप्यः"। 'कृष्णजीरकस्य'–उत्पत्तिबोधिका–"काश्मीरजीरकः", "सुगन्धः"। 'उपकुञ्च्याः"–"कालिका", "स्थूलजीरकः"। 'जीरकं' कटु रूक्षं च वातहृद्दीपनं परम्। गुल्माध्मानातिसारघ्नं ग्रहणीक्रिमिहृत् परम्॥ 'गौराजाजी' हिमा रुच्या कटुर्मधुरदीपनी। क्रिमिघ्ना विषहन्त्री च चक्षुष्याऽऽध्माननाशिनी॥ जरणा (कृष्णाजाजी) कटुरुष्णा च कफशोफनिकृन्तनी। रुच्या जीर्णज्वरघ्नी च चक्षुष्या ग्राहिणी परा॥ 'वन्यजीरः' कटुः शीतो व्रणहा पञ्चनामकः॥ धन्वन्तरीयनिघण्टुः॥ 'जीरकः' कटुरुष्णश्च वातहृद्दीपनः परः। गुल्माध्मानातिसारघ्नो ग्रहणीक्रिमिहृत् परः॥ 'गौराजाजी' हिमा रुच्या कटूर्मधुरदीपनी। क्रिमिघ्नी विषहन्त्री च चक्षुष्याऽऽध्माननाशनी॥ जरणा (कृष्णाजाजी) कटुरुष्णा च कफशोफनिकृन्तनी। रुच्या जीर्णज्वरघ्नी च चक्षुष्या ग्राहिणी परा॥ 'जीरकादिगुणाः'–जीरकाः कटुकाः पाके क्रिमिघ्ना वह्निदीपनाः। जीर्णज्वरहरा रुच्या व्रणहाऽऽध्माननाशनाः॥ राजनिघण्टुः॥ 'जीरकत्रितयं' रूक्षं कटूष्णं दीपनं लघु। सङ्ग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्॥ ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम्। चक्षुष्यं पवनाऽऽध्मानगुल्मछर्द्यतिसारहृत्॥ भावप्रकाशः॥ जीरकं रुचिकृत् स्वादु गन्धाढ्यं कफवातजित्। पाके कटु च तीक्ष्णोष्णं लघुपित्ताग्निवर्द्धनम्॥ राजवल्लभः।

अन्वर्थसंज्ञा वृक्षाम्लस्य– "शाकाम्लम्", "चूडाम्लम्", "फलाम्लम्", "अम्लबीजम्"। अम्लिकायाः फलञ्चाम्लमत्यन्तं पित्तकृल्लघु। रक्तकृद्वातशमनं वस्तिशुद्धिकरं परम्॥ 'पक्वन्तु' मधुराम्लञ्च भेदि विष्टम्भि वातजित्। 'त्वग्भस्म' स्यात् कषायोष्णं कफघ्नन्त्वनिलापहम्॥ धन्वन्तरीयनिघण्टुः॥ चिञ्चाऽत्यम्ला भवे'दामा' 'पक्वा' तु मधुराम्लिका। वातघ्नी पित्तदाहास्त्रकफदोषप्रकोपनी॥ अम्लिकायाः फलन्त्वाममत्यम्लं लघु पित्तकृत्। 'पक्वन्तु' मधुराम्लं स्याद् भेदि विष्टम्भवातजित्॥ 'पक्वचिञ्चाफलरसो' मधुराम्लो रुचिप्रदः। शोफपाककरो लेपाद् व्रणदोषविनाशनः॥ 'चिञ्चापत्रञ्च' शोफघ्नं रक्तदोषव्यथापहम्। तस्य शुष्क'त्वचाक्षारः' शूलमन्दाग्निनाशनः॥ राजनिघण्टुः॥ तिन्तिडीकं (वृक्षाम्लं) च वातघ्नं ग्राह्युष्णं रुचिकृल्लघु। धन्वन्तरिः॥ वृक्षाम्लमम्लं कटुकं कषायं सोष्णं कफार्शोघ्नमुदीरयन्ति। तृष्णासमीरोदरहृद्गदादिगुल्मातिसारव्रणदोषनाशि॥ राजनिघण्टुः॥ 'वृक्षाम्लमाम' मम्लोष्णं वातघ्नं कफपित्तलम्। 'पक्वन्तु' गुरु सङ्ग्राहि कटुकं तुवरं लघु॥ वृक्षाम्लमुष्ण-रोचनं दीपनं कफवातकृत्। तृष्णार्शोग्रहणीगुल्मशूलहृद्रोगजन्तुजित्॥ भावप्रकाशः॥ अम्लिकाम्ला गुरुर्वातहरी पित्तकफास्त्रकृत्। 'पक्वा' तु दीपनी रूक्षा सरोष्णा कफवातनुत्॥ भावप्रकाशः॥ 'वृक्षाम्लं' ग्राहि रूक्षोष्णं वातश्लेष्मणि शस्यते। 'अम्लिकायाः' फलं पक्वं तस्मादल्पान्तरं गुणैः॥ (सूः २७ अः)। चरकः॥ चिञ्चा'पुष्पन्तु' तुवरं स्वाद्वम्लञ्च रुचिप्रदम्। विशदं चाग्निजनकं लघुवातकफापहम्॥ प्रमेहघ्नं समुद्दिष्टं पर्णं शोथहरं मतम्। चिञ्चा तु 'नूतना' वातकफस्य कारिणी मता। सा 'वार्षिकी' वातपित्तनाशिनी परिकीर्त्तिता॥ निघण्टुरत्नाकरः।

वैद्यके व्यवहारः—शोथे तिन्तिडीपत्रम्–"संस्वेदनक्रिया कार्या सा कार्या च पुनः पुनः। अथवा तिन्तिडीच्छदैः"। (चि. २६ अ.)। हारीतः॥ अरोचके अम्लिका–"अम्लिकागुडतोयञ्च त्वगेलामरिचान्वितम्। अभक्तच्छन्दरोगेषु शस्तं कवलधारणम्॥" (अरोचक-चि.)। (२) मसूरिकायां चिञ्चाच्छदः– "निशाचिञ्चाच्छदे शीतवारिपीते तथैव तु। (मसूरिका-चि.)। (३) नवे प्रतिश्याये चिञ्चापत्रम्–"नवे प्रतिश्याये शस्तो यूषश्चिञ्चादलोद्भवः। ततः पक्वं कफं ज्ञात्वा हरेच्छीर्षविरेचनैः॥" (नासारोग-चि.)। चक्रदत्तः॥ (१) गुल्मे चिञ्चाक्षारः–"पलाशवज्रिशिखरीचिञ्चार्कतिलनालजाः। यवजः स्वर्जिका चेति क्षारा अष्टौ प्रकीर्त्तिताः॥ एते गुल्महराः क्षारा अजीर्णस्य च पाचकाः॥" (गुल्म-चि.)। (२) अस्थिभग्ने अम्लिका–"अम्लिकाफलकल्कैः सौवीरतैलमिश्रितैः स्वेदात्। भग्नाभिहतरुजाघ्नैः..."। (भग्न-चि.)। भावप्रकाशः॥ वातव्याधौ तिन्तिडीपत्रम्–"तिन्तिडीकदलैः सिद्धं तालमण्डिकया सह। पिष्ट्वा सुखोष्णमालेपं दद्याद्वातरुजापहम्॥" (वातव्याधि-चि.)। वङ्गसेनः।

विविध भाषाओं में नाम–

सं.– वृक्षाम्लम्, तिन्तिडीकाम्, चुक्रम, अम्लवृक्षकम्। हि.– विषाम्बिल, कोक, महाद। बं.– अमलकुटा, चकार्त तुल। म.– आमसोल, कोकम, आमटै। गु.– कोकम। क.– तित्ती डिक। मा.– कोकन, डासर्या। अं.– Kokambutter tree (कोकम वटर ट्री)। ले.– Garcinia indica (गारसिनिया इन्डिका)।

तिन्तिडीक की अन्वर्थ संज्ञा- शाकाम्लम्, चूडाम्लम्, फलाम्लम्, अम्लबीजम्।

गुण-दोष-

धन्वन्तरीय निघण्टु के अनुसार- अम्लिका का फल अम्ल रस वाला अत्यन्त पित्त कारक तथा लघु है। यह रक्त कारक, पित्त शामक तथा उत्तम वस्ति शोधक है। पका हुआ अम्लिका का फल मल भेदक, विष्टम्भि तथा वातकारक है। अम्लिका के छाल का भस्म कषाय रस वाला तथा उष्ण है और यह कफ विकार का नाश करता है तथा वात विकार को दूर करता है।

राज निघण्टु के अनुसार- आम चिञ्चा अम्ल रस वाली होती है और पक्व चिञ्चा मधुर तथा अम्ल होती है। यह वातनाशक है तथा पित्त विकार, दाह, रक्त विकार एवं कफ दोष को प्रकुपित करती है। अम्लिका का आम फल में अत्यधिक अम्ल होता है, लघु है तथा पित्त कारक है। पका हुआ अम्लिका फल मधुर तथा अम्ल रस वाला है, मल भेदन कर, विष्टम्भ कारक है तथा वात को जीत लेता है। पका हुआ चिञ्चा फल का रस मधुर तथा अम्ल रस वाला होता है और रुचिकारक है। यह शोथ तथा पाक कारक है, लेप करने से व्रण विकार का नाश करता है। चिञ्चा पत्र शोथ नाशक है, रक्त दोष तथा व्यथा को दूर करता है। चिञ्चा के सूखे त्वचा का क्षार शूल तथा मन्दाग्नि का नाश करता है।

धन्वन्तरि निघण्टु के अनुसार- तिन्तिडीक (वृक्षाम्ल) वातनाशक, ग्राही है, उष्ण है, रुचिकारक है तथा लघु है।

राजनिघण्टु के अनुसार- वृक्षाम्ल अम्ल रस वाला, कटु रस तथा कषाय रस वाला है। यह उष्ण है और कफ विकार तथा अर्श रोग का नाश करने वाला कहलाता है। यह प्यास, वात विकार, उदर विकार, हृदय रोग, गुल्म रोग, अतिसार रोग तथा व्रण दोष का नाश करता है।

भाव प्रकाश के अनुसार- आम वृक्षाम्ल अम्ल रस वाला, उष्ण, वात नाशक तथा कफ एवं पित्तवर्द्धक है। पका हुआ वृक्षाम्ल गुरु, ग्राही, कटु तथा कषाय रस एवं लघु है। यह अम्ल है, उष्ण है, रोचक, दीपक तथा कफ विकार एवं वात विकार कारक है। यह प्यास, अर्श रोग, ग्रहणी रोग, गुल्म रोग, शूल, हृदय रोग तथा क्रिमि विकार को दूर करता है। अम्लिका अम्ल रस वाली, गुरु, वातहर, पित्त-विकार, कफ विकार तथा रक्त विकार को करने वाला है। पका हुआ अम्लिका फल जाठराग्नि दीपक, रूक्ष, सारक, उष्ण तथा कफ एवं वात को दूर करता है।

चरक के अनुसार- वृक्षाम्ल ग्राही, रूक्ष तथा उष्ण है और यह वात-कफ रोग में प्रशस्त है। अम्लिका का पका फल कच्चे फल की अपेक्षा अल्पगुण वाला है।

निघण्टु रत्नाकर के अनुसार- चिञ्चाक पुष्प कषाय रस होता है, उष्ण है तथा रुचिप्रद है। यह विशद है, जाठराग्नि जनक है, लघु तथा वात-कफ को दूर करता है। यह प्रमेह नाशक कहा गया है। चिञ्चा का पत्ता शोथहर माना गया है। चिञ्चा का बीज वात तथा कफ कारक है। एक वर्ष की चिञ्चा वात पित्त नाशक कहलाती है।

वैद्यक शास्त्र में तिन्तिडी का प्रयोग-

शोथ में तिन्तिडी पत्र का प्रयोग- शोथ रोग में तिन्तिडी पत्र से बार-बार स्वेदन कर्म करे। (हा.चि.अ.२६)।

(१) अरोचक में अम्लिका का प्रयोग- अम्लिका (इमली) तथा गुड़ का जल, दाल चीनी, इलायची तथा काली मरिच का चूर्ण मिलाकर भोजन में अरुचि होने पर कवल धारण करना प्रशस्त है (चक्र.अरो.चि.)। (२)

मसूरिका में चिञ्चापत्र का प्रयोग- रात्रि में चिञ्चा के पत्रों से आच्छादन करना तथा शीतल जल पीना मसूरिका रोग में लाभप्रद है (चक्र-मसूरिका चि.)। (३) **नवीन प्रतिश्याय में चिञ्चा पत्र का प्रयोग**- चिञ्चा पत्र का यूष कफ पका हुआ जानकर नवीन प्रतिश्याय में शीरोविरेचन द्वारा निकाले (चक्र.नासारोग चि.)।

(१) गुल्म रोग में चिञ्चा क्षार का प्रयोग- पलास, वज्र, अपामार्ग, चिञ्चा, मदार, तिल तथा नाल यव तथा सज्जीखार ये आठ क्षाराष्टक हैं। ये सब गुल्मरोग को दूर करने वाले हैं तथा अजीर्ण को पचाने वाले हैं (भावप्रकाश, गुल्म चि.)। (२) **अस्थिभग्न में अम्लिका (इमली) का प्रयोग**- अम्लिका के फल के कल्क को सौवीर (काञ्जी) तथा तैल में मिलाकर स्वेदन करने से अस्थिभग्नजन्य पीड़ा का नाश होता है (भावप्र. भग्न चि.)।

वातव्याधि में तिन्तिडीक पत्र का प्रयोग- तिन्तिडी के पत्तों से सिद्ध तालमण्डिक के साथ पीस कर तथा थोड़ा गरम कर लेप करने से वातज पीड़ा दूर होती है।

Constituents—The pulp contains tartaric 5 p.c., citric 4 p.c., malic and acetic acids, bitartrate of potassium, sugar, gum and pectin, the seed's testa contains tannin, a fixed oil and insoluble matter.

Actions and uses—Pulp antiscorbutic refrigerant and laxative; used in fever to quench thirst, in sun-stroke and in bilious vomiting. As an aperient, it is given in habitual constipation. The pulp and the leaves made hot are applied locally to inflammatory swellings. A gargle of it is given in aphthous sores, and for the relief of sore-throat. The seeds are given in dysentery. The ash obtained from the suber is used as an alkaline medicine in acidity of urine and in gonorrhoea. (R. N. Khory, Part II., p. 231).

तिन्दुकम्

Diospyros embryopteris

तिन्दुकम्–*Diospyros embryopteris, Pers.*, **विषतिन्दुकम्, कारस्करः**–*Strychnos nux-vomica, Linn.*

अन्वर्थसंज्ञा–कारस्करस्य–"विषद्रुमः", "रम्यफलः", "कालकुटकः"। तिन्दुकस्य– "नीलसारः", "कालस्कन्धः"। 'आमं' कषायं साङ्ग्राहि तिन्दुकं वातकोपनम्। विपाके गुरुः 'सम्पक्वं' मधुरं कफपित्तजित्॥ धन्वन्तरीयनिघण्टुः॥ 'तिन्दुकस्तु' कषायः स्यात् सङ्ग्राही वातकृत् परः। 'पक्वन्तु' मधुरः स्निग्धो दुर्जरः श्लेष्मलो गुरुः॥ 'कारस्करः' कटूष्णश्च तिक्तः कुष्ठविनाशनः। वातामयास्रकण्डूतिकफामार्शोव्रणापहः॥ राजनिघण्टुः॥ 'स्यादामं' तिन्दुकं ग्राहि वातलं शीतलं लघु। 'पक्वं' पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु॥ 'कुपीलु' (विषतिन्दुकम्) शीतलं तिक्तं वातलं मदकृल्लघु। परं व्यथाहरं ग्राहि कफपित्तास्रनाशनम्॥ भावप्रकाशः॥ 'विषतिन्दु'र्हिमस्तिक्तः कफवातविषापहः। कारस्कारो मदकरस्तुवरो ग्राहकः स्मृतः॥ कटुस्तिक्तो लघुश्चोष्णः कुष्ठरक्तविकारहा। कण्डूं कफं वातरोगं व्रणञ्चार्शोज्वरं जयेत्॥ निघण्टुरत्नाकरः।

वैद्यके व्यवहारः–गात्रसवर्णकरत्वे तिन्दुकम्–"लेपः सवर्णकृत् पिष्टं स्वरसेन च तिन्दुकम्"

(उ. ३२ अ.)। वाग्भटः॥ अतिसारे तिन्दुकम्–"तिन्दुकत्वचमाहृत्य काश्मरीपत्रवेष्टितम्। मृदा विलिप्य विधिवद्दहेन्मृद्वग्निना भिषक्॥ रसं गृहीत्वा सक्षौद्रं सर्वातिसारनाशनम्"। (चि. ३ अ.)। हारीतः॥ अग्निदग्धे तिन्दुकम्–"तिन्दुकस्य कषायैर्वा घृतमिश्रैः प्रलेपयेत्। सर्वेषामग्निदग्धानामेतद्रोपणमुत्तमम्॥" (आगन्तुव्रण-चि.)। भावप्रकाशः॥ शिशोर्हिक्कासु तिन्दुकपुष्पफले–"जम्बूकतिन्दुकानाञ्च पुष्पाणि च फलानि च। घृतेन मधुना लीढ्वा मुच्यते हिक्कया शिशुः॥" (बालरोग-चि.)। वङ्गसेनः।

विविध भाषाओं में नाम–

सं.– तिन्दुकः, स्फूर्जकः, कालस्कन्धः, शितिसारकः। हि.– तेन्दू, गावः। बं.– गाव, तेंदू। म.– टेमुणी, आयना, देम्वरूपणी। गु.– टीम्वरवो, टीवरु, टेमरु। क.– तुम्बरु, तुम्बर। ते.– तामिक, तुमि। फा.– अवनु सुझाड़। अ.– अवुनूस। अं.– Abony (एवोनी)। ले.– Diospyros embryopteris (डायोस्पारास-एम्ब्रियोप्टेरिस)।

कारस्कर की अन्वर्थ ज्ञापिका संज्ञा– विषद्रुमः, रम्यफलः, कालकूटकः। **तिन्दुक की अन्वर्थ ज्ञापिका संज्ञा–** नीलसारः, कालस्कन्धः।

गुण-दोष–

धन्वन्तरीय निघण्टु के अनुसार– आम तिन्दुक कषाय रस वाला तथा ग्राही है और वात को प्रकुपित करता है, विपाक में गुरु है। पका हुआ तिन्दुक मधुर है तथा कफ तथा पित्त को दूर करता है।

राजनिघण्टु के अनुसार– तिन्दुक कषाय रस वाला है, ग्राही है तथा उत्तम वात कारक है। पका हुआ तिन्दुक फल मधुर रस, स्निग्ध, दुष्पच, कफ कारक तथा गुरु है। कारस्कर कटु रस, उष्ण तथा कटु रस है और कुष्ठरोग का नाश करता है। यह वात रोग, रक्त-विकार, कण्डू, कफ विकार, अर्श विकार तथा व्रण रोग को दूर करता है।

भावप्रकाश के अनुसार– आम तिन्दुक ग्राही, वात कारक, शीतल तथा लघु है। पका तिन्दुक पित्त विकार, प्रमेह, रक्त विकार तथा कफ विकार को नष्ट करता है, मधुर है तथा लघु है। यह उत्तम व्यथानाशक है, ग्राही है, कफ विकार, पित्त विकार तथा रक्त विकार का नाश करता है।

निघण्टु रत्नाकर के अनुसार– विषतिन्दुक शीतल है, तिक्त रस है तथा कफ विकार, वात विकार एवं विष विकार का नाश करता है। कारस्कर मदकारक, कषाय रस तथा ग्राही है। यह कटु, तिक्त रस, लघु तथा उष्ण है और कुष्ठ एवं रक्त विकार को नष्ट करता है। यह कण्डू, कफ विकार, वात रोग, व्रण, अर्श रोग तथा ज्वर का नाश करता है।

वैद्यक शास्त्र में विषतिन्दुक का प्रयोग–

शरीर को सवर्ण बनाने में तिन्दुक का प्रयोग– तिन्दुक (विषतिन्दुक) को उसी के रस के साथ पीसकर उसका लेप करना वर्ण समान बनता है (वाग्भट, चि. अ. ३२)।

अतिसार में तिन्दुक का प्रयोग– विष तिन्दुक की त्वचा को लेकर गम्भारी के पत्तों से वेष्टित कर मिट्टी का लेप लगाकर मन्द आंच पर जलाये। इसके बाद उसको निचोड़कर रस निकाल ले और मधु मिलाकर चाटे। यह सभी प्रकार के अतिसार का नाश करता है (हा.चि.अ.३)।

अग्नि दग्ध में तिन्दुक का प्रयोग- तिन्दुक के कषाय में घृत मिलाकर अग्नि दग्ध व्रण पर लेप करे। यह सभी प्रकार के दग्ध व्रण को उत्तम रोपण करने वाला है (भाव. आगन्तुक व्रण चि.)।

बच्चे के हिक्का रोग में तिन्दुक के पुष्प तथा फल का प्रयोग- जामुन तथा तिन्दुक के पुष्प एवं फल को पीसकर घृत तथा मधु के साथ चटाये। इसके चाटने से बालक हिक्का रोग से छुटकारा पा जाता है (वंगसेन, बालरोग चि.)।

***Constituents** of Strychnos nuxvomica*—The seeds contain strychnine 1/2 p.c.; Brucine 1/4 to 1 p.c., Igasurine or impure frucine in combination with igasuric or strychnic acid. Loganin, a glucoside; proteids II p. c.; yellow colouring matter a concrete oil or fat, gum starch, sugar 6 p.c.; wax, earthy phosphates and ash 2 p.c. The wood bark and leaves contain brucine but no strychnine.

Actions and uses—The seeds are nervine, stomachinc, tonic and aphrodisiac. Externally the paste is antiseptic; the solution is highly irritant to the tissues. If injected subcutaneously it is poisonous. The action of nuxvomica is that of strychnine. In small doses it stimulates the stomach and intestines, increases the gastric, the pancreatic, the intestinal and the biliary secretions. Strychnine promotes digestion, sharpens appetite, increases peristalsis and acts as a purgative. It stimulates the uterus and the genito urinary organs, promotes menstruation and increases virile powers. It increases the flow of urine and is often found in the urine, saliva and sweats. It is a cumulative poison, it contracts the renal arteries and thus hinders its own excretion by the kidneys. In large doses it produces tetanic spasms with relaxation between the paroxysms. During the paroxysm is causes contraction of the arterioles and thereby raises the blood pressure. The pupils are dilated, there are jerking movements of the limbs, the respiration becomes spasmodic, the lower jaw becomes stiff and there is risus sardonicus or an unmeaning smile depicted on the face.

In poisonous doses there is an addition a sense of suffocation, great dyspnoea and rigidity of the limbs (which are stuck out) the hands are clenchid, the feet arched and the belly tense. There is oposthotenos, and the breathing becomes arrested. In the height of the paroxysm the face becomes cyanosed and the eye-balls protrude. The pulse is frequent, there is increased blood heat, but the intellect remains clear to the last. These is a feelig of a sense of approaching death. In the interval of the paroxysms there is great prostration with profuse sweating. And slight cause, as a breath of wind, some noise or even bright light, brings on the recurrence of the paroxysm. Death may be due to exhaustion or asphyxia due to prolonged rigidity of the respiratory muscles.

As a general stimulant it is given in acute or chronic fevers, anaemia, chlorosis, wasting and other exhausting diseases; also in hysteria, chorea, epilepsy, infra-orbital neuralgia or in neuralgia of the viscera &c. In local paralytic affections it should be given only after the acute stage has passed away. In prolapsus ani, in incontinence of urine, due to atony of the bladder and sometimes in impotence and spermatorrhoea it may be given wit' nefit. It is administered internally or injected subcutaneously in impending cardiac failu. rom any cause. With an imperceptible pulse, clammy breath and cold extremities, liquor strychninae has been given with advantage. It is a nice bitter tonic, in atonic dyspepsia. Given as an adjunct to purgatives

in constipation, in increases their peristaltic effects. In vomiting of pregnancy and of phthisis it is the best agent. In torpid liver with foul breath, coated and ferred tongue, pale coloured and offensive stools, if given with blue pill it is very useful. In sick headache or in headache occurring in women at the climateric period it is a very valuable agent. As a neurotic it influences the pneumogastric nerve and is useful in cough of phthisis, in bronchitis, pneumonia, emphysema; also in bronchial asthma, in cardiac or pulmonary dyspnoea, cardiac palpitation with irregular heart and in hypochondriasis; strychnine is of great service in acute and chronic alcoholism, under its use the morning vomiting, dyspepsia of drunkards and delirium tremens disappear. It removes the craving for stimulants. (R. N. Khory, Part II., pp. 407-8).

तिलः

Sesamum indicum

कृष्णतिलः—*Sesamum indicum, Linn., S. orientale, Roxb.*

अन्वर्थसंज्ञा—"होमधान्यम्", "वनोद्भवः"। तद्भेदाः—"कृष्णः", "सितः", "रक्तः", "वन्यः"। तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः। विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत्॥ बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः। दन्त्योऽल्पमूत्रकृद्ग्राही वातघ्नोऽग्निमतिप्रदः॥ धन्वन्तरीयनिघण्टुः॥ 'स्निग्धो' वर्णबलाग्निवृद्धिजननः स्तन्यानिलघ्नो गुरुः। सोष्णः पित्तकरोऽल्पमूत्रकरणः केश्योऽतिपथ्यो व्रणे। सङ्ग्राही मधुरः कषायसहितस्तिक्तो विपाके कटुः। 'कृष्णः' पथ्यतमः 'सितो'ऽल्पगुणदः क्षीणास्तथान्ये तिलाः॥ राजनिघण्टुः॥ तिलः कृष्णः सितो रक्तः स वन्योऽल्पतिलः स्मृतः॥ तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः। विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत्॥ बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः। दन्त्योऽल्पमूत्रकृद् ग्राही वातघ्नोऽग्निमतिप्रदः॥ 'कृष्णः' श्रेष्ठतमस्तेषु शुक्रलो मध्यमः 'सितः'। अन्ये हीनतराः प्रोक्तास्तज्ज्ञैः रक्तादयस्तिलाः॥ भावप्रकाशः॥ 'पिण्याकं' मधुरं रुच्यं तीक्ष्णं नेत्रविकारकृत्। मलापष्टम्भकं रुक्त-कफवातप्रमेहनुत्॥ पित्तास्रबलपुष्टिञ्च ददातीति भिषङ्मतम्। निघण्टुरत्नाकरः॥ तिलो विपाके मधुरो बलिष्ठः स्निग्धो व्रणालेपन एव पथ्यः। दन्त्योऽग्निमेधाजननोऽल्पमूत्र-स्त्वच्योऽथ केश्योऽनिलहा गुरुश्च॥ राजवल्लभः॥ तिलतैलगुणाः—तैलं स्नेहोत्तमं प्रोक्तं तिलजं तिलसम्भवम्। कषायं च रसे स्वादु सूक्ष्ममुष्णं व्यवायि च॥ पित्तलं बद्धविण्मूत्रं न च श्लेष्मविवर्द्धनम्। धन्वन्तरीयनिघण्टुः॥ स्नानाभ्यङ्गावगाहेषु तिलतैलं विशिष्यते। तद्वद्वस्तिष्वपानेषु नस्यकर्णाक्षिपूरणे॥ अन्नपानविधौ वाऽपि प्रयोज्यं वातशान्तये। छिन्नभिन्नयुतापिष्टमथितक्षतपातिते॥ भग्ने स्फुटितविद्धाग्निदग्धविश्लिष्टदारिते। भयाभिहतनिर्भुग्ने मृगव्यालादिभिः क्षते॥ तैलयोगश्च संस्कारात् सर्वरोगापहो मतः। धन्वन्तरीयनिघण्टुः॥ तिलतैलमलं करोति केश्यं मधुरं तिक्तकषायमुष्णतीक्ष्णम्। बलकृत् कफवातजन्तुखर्जुव्रणकण्डूतिहरं च कान्तिदायि॥ राजनिघण्टुः॥ तिलतैलं गुरुस्थैर्यबलवर्णकरं सरम्। वृष्यं विकाशि विशदं मधुरं रसपाकयोः॥ सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम्। वीर्येनोष्णं हिमं स्पर्शे वृंहणं रक्तपित्तकृत्॥ लेखनं बद्धविण्मूत्रं गर्भाशयविशोधनम्। दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत्॥ श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम्। त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा॥ छिन्नभिन्नच्युतोत्पिष्टमथिते क्षतपिच्छिते।

भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते॥ तथाभिहतनिर्भुग्नमृगव्याघ्रादिविक्षते। बस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे। सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते॥ भावप्रकाशः॥

वैद्यके व्यवहारः– (१) अर्शसुः तिलः–"...तिलकल्कैः... सुखोष्णैः स्नेहसंयुतैः... स्वेदयेत् पोट्टलीकृतैः" (चि. ९ अ.)। "नवनीततिलाभ्यासात्... अर्शांस्यपयान्ति रक्तानि" (चि. ९ अ.)। (२) प्रवाहिकायां तिलः–"कल्कः स्याद्बालबिल्वानां तिलकल्कश्च तत्समः। दध्नः सरोऽम्लस्नेहाढ्यः खडो हन्यात् प्रवाहिकाम्॥" (चि. १० अ.)। (३) व्रणोपनाहने तिलः–"सतिलाः... दध्यम्ला... सक्तुपिण्डिका। ...शस्ता स्यादुपनाहने॥" (चि. १३ अ.)। (४) मारुतोत्तरे व्रणे तिलः–"सदाहा वेदनावन्तो ये व्रणा मारुतोत्तराः। तेषां तिलान्युमाञ्चैव भृष्टान् पयसि निर्वृतान्॥" (चि. १३ अ.)। चरकः॥ (१) वातरक्ते तिलः–"लेपः पिष्टाः तिलास्तद्वत् भृष्टाः पयसि निर्वृताः" (चि. २२ अ.)। (२) पोषणार्थं दन्तदृढीकरणार्थञ्च तिलः–"दिने दिने कृष्णतिलप्रकुञ्चं समश्नतां शीतजलानुपानम्। पोषः शरीरस्य भवत्यनल्पो दृढीभवन्त्यामरणाच्च दन्ताः॥ (उ. ३९ अ.)। तृष्णायां तिलपिण्याकम्– "सर्वाण्यङ्गानि लिम्पेच्च तिलपिण्याककाञ्जिकैः"। (चि. ३ अ.)। वाग्भटः॥ मूत्ररोधे तिलकाण्डक्षारः– "यस्तिलकाण्डक्षारं दधिमधुसम्मिश्रितं पिबेत्। स नरश्च मूत्ररोधं हत्वा सद्यः सुखमाप्नोति॥" (चि. ३० अ.)। हारीतः॥ (१) वातशूले तिलः–"तिलैश्च गुडिकां कृत्वा भ्रामयेज्जठरोपरि। गुडिका शमयत्येषा शूलञ्चैवातिदुःसहम्॥" (शूल-चि.)। (२) अश्मर्यां तिलनालक्षारः–"तद्वन्मधुदुग्धयुक्ता त्रिरात्रं तिलनालभूतिश्च" (अश्मरी-चि.)। चक्रदत्तः॥ (१) आमवाते तिलः–"कल्कमद्याद्वा तिलविश्वयोः" (आमवात-चि.)। (२) व्रणशोधनरोपणे तिलः–"वर्त्तिस्तिलानां कल्को वा शोधयेद्रोपयेद्व्रणम्"। (व्रणशोथ-चि.)। (३) सूर्यावर्त्ते तिलः–"क्षीरपिष्टैस्तिलैः स्वेदः" (शिरोरोग-चि.)। (४) मांसभक्षणजाजीर्णे तिलनालक्षारः–"मांसानि सर्वाण्यपि यान्ति पाकं क्षारेण सद्यस्तिलनालजेन" (विशिष्टद्रव्याजीर्ण-चि.) (५) इन्द्रलुप्ते तिलपुष्पम्–"गोक्षुरस्तिलपुष्पाणि तुल्ये च मधुसर्पिषी। शिरःप्रलेपितं तेन केशैः समुपचीयते।" (क्षुद्ररोग-चि.)। भावप्रकाशः॥ (१) रक्तातिसारे तिलः– "वदरीमूलकल्कन्तु तिलकल्कं तथैव च। संगृह्य सरसं तेषामजाक्षीरेण योजयेत्॥" (अतिसार-चि.)। (२) नेत्ररोगे तिलः–"स्थानं कृष्णतिलैश्चापि चक्षुष्यं तिमिरापहम्" (नेत्ररोग-चि.)। वङ्गसेनः॥

विविध भाषाओं में नाम–

सं.– तिलः, होमधान्यम्, पितृतर्पणः। हि.– तिल, तिल्ली, तील, मीठा तिल। बं.– तिलगाछ। म.– तिल, तील। गु.– तैल। द्रा.क.– एलु, एल्लु। ते.– तोवुलु, मचिनूने, जुव्वुलु। ता.– वल्लेनेव, वल्लेन्नेव। द्रा.– वाटिक तिल। फा.– कुन्दजखस खास। स्याह, कोकिनार। अ.– सिमोसिम, वजरुखस। अं.– Sesamum nige seeds (सिसेमम निगर सीड्स)। ले.– Sesamum indicum (सिसेमम इण्डिकम)।

तिल की अन्वर्थ ज्ञापिका संज्ञा– होमधान्यम्। वनोद्भवः।

तिल के भेद– कृष्णः, सितः, रक्तः, वन्यः।

गुण-दोष–

धन्वन्तरीय निघण्टु के अनुसार– तिल रस में कटु, तिक्त, मधुर तथा कषाय है और गुरु है। विपाक में

कटु है, स्वादिष्ट है, स्निग्ध तथा उष्ण है और कफ विकार एवं पित्त विकार को दूर करता है। तिल बल कारक है, केश वर्द्धक है, स्पर्श में शीतल है, त्वचा के लिए हितकर है, दूध वर्द्धक है तथा व्रण के लिए हितकर है। यह दांत के लिए हितकर, थोड़ा मूत्र कारक, ग्राही, वातनाशक तथा अत्यधिक जाठराग्नि को बढ़ाने वाला है।

राजनिघण्टु के अनुसार– तिल स्निग्ध, वर्ण, बल तथा जाठराग्नि वर्द्धक है, दूध विकार तथा वात विकार का नाश करता है। यह उष्ण है, पित्त कारक है, थोड़ा मूत्रकारक है, केश के लिए हितकर है तथा व्रण के लिए अधिक पथ्यकर है। यह ग्राही है, मधुर तथा कषाय एवं तिक्त रस है तथा विपाक में कटु है। काला तिल पथ्यकारक है, सफेद तिल थोड़ा गुणकारक है, अन्य सभी प्रकार के तिल क्षीण गुण वाले हैं।

भावप्रकाश के अनुसार– काला तिल, सफेद तिल, रक्त तिल, वन्द तिल या अल्प तिल इस प्रकार तिल चार प्रकार का होता है। तिल–रस में कटु, तिक्त, मधुर तथा कषाय रस है और गुरु है। विपाक में कटु रस, स्वादिष्ट, स्निग्ध तथा उष्ण है और कफ एवं पित्त कारक है। यह बल कारक, केशवर्द्धक, शीतस्पर्श त्वचा के लिए हितकर, दूध बढ़ाने वाला तथा व्रण के लिए हितकर है। यह दांत के लिए हितकर, थोड़ा मूत्रकारक, ग्राही तथा वात नाशक है और अधिक जाठराग्नि वर्द्धक है। काला तिल सभी तिलों में श्रेष्ठ है तथा शुक्रवर्द्धक है। सफेद तिल मध्यम गुण वाला है। अन्य रक्त आदि तिल हीन गुणवाले हैं ऐसा तिल के गुण को जानने वाले कहते हैं।

निघण्टु रत्नाकर के अनुसार– पिण्याक तिल की खली मधुर है, रुचिकारक है, तीक्ष्ण है तथा नेत्र विकार को उत्पन्न करता है। यह मल को रोकने वाला है, रक्त विकार, कफ विकार, वात विकार तथा प्रमेह को नष्ट करता है। यह रक्त पित्त को बढ़ाता है, बल कारक तथा पुष्टि कारक है ऐसा चिकित्सकों का मत है।

राजवल्लभ के अनुसार– तिल विपाक में मधुर, बलकारक है, स्निग्ध है तथा इसे व्रण के ऊपर लेप करना ही पथ्य है। यह दांत के लिए हितकर है, जाठराग्नि तथा मेधावर्द्धक है, थोड़ा मूत्रल है, रुचिकारक है, केश के लिए हितकर है, वातनाशक है तथा गुरु है।

धन्वन्तरीय निघण्टु के अनुसार– तिल के तैल को उत्तम स्नेह कहा गया है। यह कषाय रस वाला, रस में स्वादिष्ट, सूक्ष्म तथा उष्ण है और व्यवायि है। इनके अतिरिक्त पित्त कारक है, मलमूत्र को रोकने वाला है किन्तु कफ को नहीं बढ़ाता है। तिल का तैल स्नान, अभ्यङ्ग तथा अवगाहन के लिए विशेष लाभदायक है। इसी प्रकार यह अपानबस्ति में तथा नस्य कर्म, कर्ण पूरण तथा नेत्र पूरण तथा अन्न पान विधि में वात शान्ति के लिए प्रयोग करने योग्य है। छिन्न, भिन्न, पिष्ट, भक्षित, क्षत, पातित, भग्न, फुटित, विद्ध, अग्नि दग्ध, विश्लिष्ट, दारित, भय आदि से अभिहत, भुग्न, मृत तथा व्याघ्र आदि के द्वारा क्षत होने पर इस तैल के योग से तथा तैल के संस्कार से सभी रोगों को दूर करने वाला है।

राजनिघण्टु के अनुसार– तिल का तैल केश को अलंकृत बनाता है, मधुर है, तिक्त है, कषाय है, उष्ण है, तीक्ष्ण है, बल कारक है, कफ विकार, वात विकार, क्रिमि विकार, खुजली तथा कण्डू को दूर करता है तथा कान्ति दायक है।

भावप्रकाश के अनुसार– तिल का तैल गुरु, बल तथा वर्ण को स्थिर करने वाला एवं दस्तावर है, वीर्यवर्द्धक है, विकाशि है, विशद है और रस तथा विपाक में मधुर है; सूक्ष्म है, कषाय रस वाला है तथा तिक्त रस वाला है और वात कफ नाशक है। यह उष्ण वीर्य है, स्पर्श में शीतल है, बलवर्द्धक है तथा रक्त–पित्त कारक है, लेखन है, मल–मूत्र को रोकने वाला है तथा गर्भाशय को शुद्ध करने वाला है; जाठराग्नि दीपक है, बुद्धिवर्धक,

मेधावर्द्धक है, व्रण तथा प्रमेह रोग को दूर करता है, योनि विकार तथा शिर:शूल का नाश करता है तथा हल्का करता है; त्वचा के लिए हितकर, केश के लिए हितकर है, नेत्र के लिए हितकर अभ्यङ्ग करने से होता है; भोजन करने पर अन्य गुण होते हैं। यह छिन्न, भिन्न, च्युत, उत्पिष्ट, मथित, क्षत, पिच्छित, भग्न, स्फुटित, विद्ध, अग्नि दग्ध, विश्लिष्ट, दारित, अभिहत, निर्भुग्न तथा मृग-व्याघ्र आदि से क्षत होने पर, वस्ति कर्म में, पान करने तथा अन्न का संस्कार करने, नस्य में, कर्ण तथा नेत्र पूरण में, सेक, अभ्यङ्ग तथा अवगाहन में तिल का तैल प्रशस्त है।

वैद्यक शास्त्र में तिल का प्रयोग-

(१) अर्श रोग में तिल का प्रयोग- तिल के कल्क को थोड़ा गरम कर तथा तेल मिलाकर पोटली में रखकर स्वेदन करे (च.चि.अ.९)। मक्खन तथा तिल का कल्क प्रतिदिन सेवन करने से रक्तार्श शान्त होते हैं (च.चि.अ.९)। (२) **प्रवाहिका में तिल का प्रयोग-** कच्चा बेल तथा तिल का कल्क समान भाग लेकर दही का अम्ल पानी तथा स्नेह को मिलाकर खंड बनावे और सेवन करे। यह प्रवाहिका का नाश करता है (च. चि.अ.१०)। (३) **व्रण के उपनाह के लिए तिल का प्रयोग-** तिल का कल्क अम्ल दही तथा सत्तू की पीड़ी एक साथ मिलाकर व्रण का उपनाहन (बाँधना) हितकर है (च.चि.अ.१३)। (४) **वातज व्रण में तिल का प्रयोग-** जो व्रण वातजन्य दाह तथा वेदना वाले हैं उनको तिल तथा तीसी के कल्क को दूध में पकाकर (पुल्टिस) बाँधे। यह व्रण को शान्त करता है (च.चि.अ.१३)।

(१) वातरक्त में तिल का प्रयोग- तिल को पीस कर तथा दूध में पकाकर वात रक्त में लेप करे (वाग्भट, चि.अ.२२)। **(२) पोषण के लिए तथा दांतो को मजबूत बनाने के लिए तिल का प्रयोग-** काले तिल को कूटकर शीतल जल के साथ जो खाते हैं उनके शरीर का अच्छी तरह पोषण होता है तथा दांत जीवन पर्यन्त मजबूत रहते हैं (वाग्भट, उ.अ.३९)।

तृष्णा में तिल पिण्याक का प्रयोग- तृष्णा रोग में तिल की खली तथा काञ्जी मिलाकर पूरे शरीर में लेप करे (वाग्भट.चि.अ.३)।

मूत्र रोग में तिलकाण्ड क्षार का प्रयोग- जो व्यक्ति तिल के काण्ड (शाखा) के क्षार को दही तथा मधु मिलाकर पान करता है उसका मूत्रावरोध शान्त हो जाता है और वह शीघ्र ही सुख का अनुभव करता है (हा.चि.अ.३०)।

(१) वातशूल में तिल का प्रयोग- तिल के कल्क की गुटिका बनाकर उदर के ऊपर घुमाये। यह गुटिका पेट के ऊपर घुमाने से अतिदु:सह उदर की पीड़ा को शान्त करती है (चक्र.शूल चि.)। (२) **अश्मरी में तिल नाल क्षार का प्रयोग-** तिल के नाल का क्षार मधु तथा दूध मिलाकर सेवन करने से तीन दिन में अश्मरी रोग नष्ट होता है (चक्र.अश्मरी चि.)।

(१) **आमवात में तिल का प्रयोग-** तिल तथा सोंठ के कल्क को आमवात रोग में भक्षण करे (भाव. आमवा.चि.)। (२) **व्रण शोधन तथा रोपण में तिल का प्रयोग-** तिल की वर्ति या कल्क व्रण का शोधन तथा रोपण करते हैं (भाव.व्रण शोथ.चि.)। (३) **सूर्यावर्त में तिल का प्रयोग-** सूर्यावर्त रोग में तिल को दूध के साथ पीस कर स्वेदन करे (भाव.शिरोरोग चि.)। (४) **मांस भक्षण जन्य अजीर्ण में तिल नाल क्षार का प्रयोग-** तिल के नाल का क्षार सेवन करने से सभी प्रकार के मांस भक्षण जन्य अजीर्ण का पाचन होता है (भाव.विशिष्ट द्रव्याजीर्ण चि.)। (५) **इन्द्रलुप्त रोग में तिल पुष्प का प्रयोग-** गोखरु तथा तिल का पुष्प समभाग

लेकर मधु तथा घृत मिलाकर सिर के ऊपर लेप करने से इन्द्रलुप्त रोग में सिर के ऊपर बाल उग आते हैं (भाव.क्षुद्ररोगचि.)।

(१) रक्तातिसार में तिल का प्रयोग- बरे के मूल का कल्क तथा तिल का कल्क लेकर बकरी के दूध के साथ सरस बनाकर रक्तातिसार में सेवन करे (वंगसेन, अतिसार चि.)। **(२) नेत्ररोग में तिल का प्रयोग**- आंख के ऊपर कृष्ण तिल के कल्क का लेप करना नेत्र के लिए हितकर है तथा तिमिर रोग (मोतिया बिन्द) को शान्त करता है (बंगसेन, नेत्र रोग चि.)।

Constituents—Fixed oil 50 to 60 p.c.; proteid 22 p.c., mucilage 4 p.c., and ash 48 p.c.

Actions and uses—The seeds are used as food. As laxative they are used in removing constipation and in piles. As demulcent they are given in dysentery, and as diuretic in urinary diseases. The oil is used as a hair oil in place of olive oil for which it is a very good substitute. It is useful in preparing plasters, and other medicated fragrant or scented oils. (R. N. Khory, Part II., p. 462).

तुलसी

Ocymum sanctum

तद्भेदाः–सुरसा(सः), कुठरेका(अर्जकाः)स्त्रयः; मरुवकः, सुमुखा, वर्वरः। सुरसा, तुलसी–*Ocymum sanctum,* **कुठेरकाः (अर्जकाः)**–*O. villosum,* **मरुवकः फणिज्जकः**–*O. gratissimum Willd.* **सुमुखः, वनवर्वरिका**–*O. caryophyllatum Roxb.* **वर्वरः**–*O. pilosum Roxb.*

अन्वर्थसंज्ञा–सुरसायाः–"ग्राम्या", "सुलभा", "बहुमञ्जरी", "बहुपत्री", "पावनी", "विष्णुवल्लभा", "शूलघ्नी"। फणिज्जकस्य–"खरपत्रः", "गन्धपत्रः", "बहुवीर्यः", "प्रस्थकुसुमः", "आजन्मसुरभिपत्रः"। त्रयाणां कुठेरकानां–"क्षुद्रपर्णः", "कठपत्रः", "बिल्वगन्धः", "कृष्णमल्लिका"। सुमुखस्य (वनवर्वरकस्य)–"कठपत्रः", "सुगन्धि"। वर्वरस्य–"ज्वरघ्नः", "सूक्ष्मपत्रकः", "निद्रालुः" "शोफहारी"। 'तुलसी' लघुरुष्णा च रूक्षा कफविनाशनी। क्रिमिदोषं निहन्त्येषा रुचिकृद्वह्निदीपनी॥ 'फणिज्जको' हिमस्तिक्तो रूक्षः कफविनाशनः। रक्तहारी तथा हन्ति सुघोरं कृत्रिमं विषम्। 'मरुवकः' कफहरी रुच्यो मुखसुगन्धकृत्। 'अर्ज्जकः' शीतलस्तिक्तः श्लेष्मामयविनाशनः॥ द्विविधञ्च विषं हन्याद्दुष्टरक्त-विनाशनः॥ 'कुठेरकाः' सुगन्धाः स्युः कटुपाकरसाः स्मृताः। पित्तघ्ना लघुरूक्षाश्च तीक्ष्णोष्णाः पित्तवर्द्धनाः॥ पित्तकृत् पार्श्वशूलघ्नः 'सुमुखः' समुदाहृतः। कफानिलविषश्वासकासदौर्गन्ध्यनाशनः॥ धन्वन्तरीयनिघण्टुः॥ 'तुलसी' कटुतिक्तोष्णा तुलसी श्लेष्मवातजित्। जन्तुभूतकृमिहरा रुचिकृद्वात-शान्तिकृत्॥ 'मरुवः' कटुतिक्तोष्णः क्रिमिकुष्ठविनाशनः। विड्बन्धाऽऽनाहशूलघ्नो मान्द्यत्वग्दोषनाशनः॥ त्रयोऽर्ज्जकाः कटूष्णाः स्युः कफवातामयापहाः। नेत्रामयहरा रुच्याः सुखप्रसवकारकाः॥ कृत्रिमञ्च विषं हन्यू रक्तदोषविनाशनाः॥ 'वनवर्वरिका' चोष्णा सुगन्धी कटुका च सा। पिशाचवान्तिभूतघ्नी घ्राणसन्तर्पणी परा॥ राजनिघण्टुः॥ 'तुलसी' कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्। दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित्॥ 'शुक्ला' 'कृष्णा' च तुलसी गुणैस्तुल्या प्रकीर्त्तिता। वर्वरत्रितयं रूक्षं शीतं कटु विदाहि च। तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च॥ पित्तलं

कफवातास्त्रकण्डूक्रिमिविषापहम्। भावप्रकाशः॥ तुलसी पित्तकृद्वातक्रिमिदौर्गन्ध्यनाशनी। पार्श्वशूलाऽरतिश्वासकासहिक्काविकारजित्॥ राजवल्लभः॥

वैद्यके व्यवहारः– कफजकासे असितसुरसः– "दक्षीद्राः कफकासघ्नाः सुरसस्यासितस्य च"। (चि. २२ अ.)। चरकः॥ नासारोगे सुरसा– "श्लैष्मिके सुरसावासारसेन विहितञ्च तत्" (चि. ४२ अ.)। हारीतः॥ (१) पोथक्यां फणिज्जकदलम्– "फणिज्जकरसोनस्य रसैः पोथकिनाशनः" (नेत्ररोग-चि.)। (२) वृश्चिकदंशे कुठेरमूलम्– "दंशे भ्रामणविधिना वृश्चिकविषहृत् कुठेरपादगुडिकाः" (विष-चि.)। चक्रदत्तः॥ (१) वातव्याधौ– "वृहत्फणिज्जकोत्थेन रसेन परिलेपयेत्। प्रदेशं वायुना ग्रस्तं नरः सम्यक् प्रशान्तये॥" (वातव्याधि-चि.)। (२) शुक्रनामाक्षिरोगे फणिज्जकदलस्वरसः– "फणिज्जकरसे बीजं पलाशस्य विभावितम्। शोषयित्वा सुपिष्टं तत् चाञ्जनाच्छुक्रहृत् परम्॥" (नेत्ररोग-चि.)। (३) वरटीविषे फणिज्जकरसः– "फणिज्जकरसं हन्याल्लेपनाद्वरटीविषम्"। (विषाधिका.)। वङ्गसेनः॥

विविध भाषाओं में नाम–

सं.- तुलसी, सुरसा, ग्राम्या, सुलभा, बहुमञ्जरी। हि.- तुलसी, वरण्डा। बं.गु.- तुलसी, पेझा, तुलस। क.- एरहे तुलसी। द्रा.- तुल्सी। ते.- गगभरे चेट्टु। ता.- तुलशी। फा.- शाह सिपरम्। अ.- तुलसी वदरुत, शाह सफरस। अं.- Holy bisil (होली विसील)। ले.- Ocymum sanctum (ओसिमम सेंक्टम)।

तुलसी की अन्वर्थ ज्ञापिका संज्ञा- सुरसा- ग्राम्या, सुलभा, बहुमञ्जरी, बहुपत्री, पावनी, विष्णुवल्लभा। शूलघ्नी। **फणिपत्रक-** खरपत्रः, गन्धपत्रः, बहुवीर्यः, प्रस्थकुसुमः, आजन्मसुरभिपत्रः। **तीनों प्रकार के कुठेरक की अन्वर्थ ज्ञापिका संज्ञा-** क्षुद्रपर्णः, कठपत्रः, बिल्वगन्धः कृष्णमल्लिका। **सुमुख (वर्वरक) की अन्वर्थ संज्ञा-** कठपत्रः, सुगन्धि। **वर्वरक की अन्वर्थ संज्ञा-** ज्वरघ्नः, सूक्ष्मपत्रकः, निद्रालुः, शोफहारी।

गुण-दुष–

धन्वन्तरीय निघण्टु के अनुसार- तुलसी, लघु, उष्ण तथा रूक्ष है और कफ नाशक है, यह क्रिमि विकार को नष्ट करती है, रुचिकारक है तथा जाठराग्नि दीपक है। **फणिज्जक** शीतल, तिक्तरस तथा रूक्ष है और कफ का नाश करता है। यह रक्त विकार को दूर करता है। भयंकर क्रित्रिम विष को नष्ट करता है। **मरुवक** कफ विकार को दूर करने वाली, रुचिकारक तथा मुख को सुगंधित करने वाला है। **अर्जक** शीतल तथा तिक्तरस वाला है और कफ विकार का नाश करता है। यह दोनों प्रकार के विष को नष्ट करता है तथा सर्पदंश विष का नाश करता है। **कुठेरक** सुगन्धित होता है, पाक में कटु रस कहा गया है, पित्त नाशक है, लघु है, रूक्ष है, तीक्ष्ण तथा उष्ण है और पित्त वर्द्धक है। यह पित्त कारक, पार्श्व शूल नाशक तथा मुख को सुगन्धित करने वाला है। यह कफ विकार, वात विकार, विष विकार, श्वास रोग, कास रोग तथा दुर्गन्ध का नाश करता है।

राजनिघण्टु के अनुसार- तुलसी कटु तथा तिक्त रस तथा उष्ण है तथा कफ विकार एवं वात विकार का नाश करती है। यह जन्तु रोग, भूत बाधा तथा क्रिमि रोग को दूर करती है, रुचिकारक है तथा वात विकार शांति कारक है। **मरुव** कटु तथा तिक्त रस तथा उष्ण है और क्रिमि रोग एवं कुष्ठ रोग का नाश करता है। यह बड़े बिवन्ध (मलावरोध) आनाह तथा शूल का नाश करता है और मन्दाग्नि एवं त्वचा विकार को दूर करता है। **तीनों प्रकार के अर्जक** कटु रस तथा उष्ण हैं और कफ विकार एवं वात विकार का नाश करते

हैं। ये नेत्र रोग को दूर करते हैं, रुचिकारक हैं तथा सुख पूर्वक प्रसव कराने वाले हैं। ये क्रित्रिम विष का नाश करते हैं तथा रक्त दोष को दूर करते हैं। **वनवर्वरिका**- उष्ण तथा सुगन्धित है और यह कटु रस है। यह पिशाच बाधा, वमन तथा भूत बाधा का नाश करती है और अच्छी तरह घ्राण को तृप्त करने वाली है।

भावप्रकाश के अनुसार- शुक्ल तुलसी कटु रस, तिक्त रस, हृदय को बल देने वाली तथा उष्ण है और यह दाह एवं पित्त विकार का नाश करती है। यह जाठाराग्नि दीपक है, कुष्ठरोग, मूत्रकृच्छ्र, रक्त विकार, पार्श्व शूल, कफ विकार एवं वात विकार को दूर करती है। **कृष्णा तुलसी** सफेद तुलसी के गुण के समान गुण वाली है। **तीनों प्रकार की वर्वरिका** रूक्ष, शीतल, कटु रस तथा विदाह कारक है। यह तीक्ष्ण है, रुचि कारक है, हृदय को बल देने वाली है, जाठराग्नि दीपक तथा लघुपाकी है। यह पित्तवर्द्धक है, कफ विकार, वात विकार, रक्त विकार, कण्डू , क्रिमि रोग तथा विष विकार को दूर करती है।

राजवल्लभ के अनुसार- तुलसी पित्त कारक है, वात विकार, क्रिमि रोग तथा दुर्गन्ध का नाश करने वाली है। यह पार्श्व शूल, अरति, श्वास रोग, कास रोग तथा हिक्का के विकार का नाश करती है।

वैद्यक शास्त्र में तुलसी का प्रयोग-

कफज कास में काली तुलसी के रस का प्रयोग- काली तुलसी का रस शहद के साथ सेवन करने से कफज कास का नाश होता है (च.चि.अ.२२)।

(१) नासारोग में सुरसा (तुलसी) का प्रयोग- कफज नासा रोग में तुलसी तथा अडूसा के रस का नस्य दे (चक्र.नेत्र.चि.)। (२) **वृश्चिक दंश में कुठरेक मूल का प्रयोग-** कुठरेक मूल की गुटिका वृश्चिक दंश के ऊपर घुमाने से वृश्चिक विष को दूर करता है (चक्रदत्त, विषरोग चि.)।

(१) वातव्याधि में वृहद फणिज्जक के रस का प्रयोग- मनुष्य वायु से ग्रसित स्थान के ऊपर, वृहद् फणिज्जक के रस का लेप करे (वंग. वातव्याधि चि.)। (२) **शुक्रनामक नेत्र रोग में फणिज्जक दल के स्वरस का प्रयोग-** पलाश के बीज को फणिज्जक के रस में भावित कर तथा सुखाकर पीस लें। इसके बाद नेत्रगत शुक्ररोग में अंजन करे। यह नेत्रगत शुक्ररोग को शान्त करता है (वंगसेन, नेत्र चि.)। (३) **वरदी के विष में फफिज्जक के रस का प्रयोग-** फणिज्जक का रस लेप करने से वरटी का विष नष्ट होता है (वंगसेन, विषाधिकार)।

Actions and uses of *O. album*—Stimulant, diaphoretic and carminative; given to children in cold and catarrh.

Constituents of *O. basilicum*—The leaves contain a yellowish green oil, which if kept for a time crystallizes, and is then known as Basil Camphor.

Actions and uses—Diaphoretic, mucilaginous, carminative and stimulant; given in intestinal fluxes, gonorrhoea, catarrh and to relieve after-pains in parturition; also given during the cold stage of intermittent fever and to alloy vomiting. It is dropped into the ear in ear-ache.

Actions and uses of *O. gratimum*—Demulcent and carminative; generally combined with other expectorants, in cough mixtures; also used in urinary disorders such as gonorrhoea, scanty and scalding urine, &c. Locally, the juice mixed with Gul-i-armani is used as an application to swollen hands or feet. Baths and fumigation of tulsi are used in Rheumatism.

Actions and uses of *O. sanctum*—Demulcent, expectorant and antiperiodic; with Kalamiri

it is given in catarrhal affections of the lungs and cough. The powder of dry leaves is used by the natives ns snuff in ozaena and for destroying maggots. The paste of the leaves with Suntha and Saphedamiri is given in intermittent and remittent fevers. The medicated oil is used as drops into the ears in ear-ache and in purulent discharges and into the nose in ozaena. With lime juice the leaves are rubbed over ring-worm. The seed are mucilaginous and used as a diuretic in scanty urine and in cough.

Actions and uses of *O. pilosum*—Demulcent, expectorant and gonorrhoea, strangury and kidney diseases; also in dysentery and cough. The jelly is given in speamatorrhoea. (R. N. Khory—Part II., p.p. 490—3).

तुवरकः

Cynocardia Odorata

तुवरकः–*Cynocardia odorata. R. Br.*

गुणप्रकाशिका संज्ञा–"कुष्ठला"। तुवरस्तुवरश्चोष्णो रसे पाके च तिक्तकः। कफव्रणकृमिमेह-कुष्ठज्वरविनाशनः॥ आनाहमर्शःशोफञ्च नाशयेदिति ते जगुः॥ निघण्टुरत्नाकरः॥

वैद्यके व्यवहारः– (१) कुष्ठे मधुमेहे च तुवरकतैलम्–"पञ्चकर्मगुणातीतं श्रद्धावन्तं जिजीविषुम्। योगेनानेन मतिमान् साधयेत् कुष्ठिनं नरम्॥ वृक्षास्तुवरका ये स्युः पश्चिमार्णवभूमिषु। वीचीतरङ्गविक्षेपमारुतोद्धूतपल्लवाः॥ तेषां फलानि गृह्णीयात् सुपक्वान्यम्बुदागमे। मज्जस्तेभ्योऽपि संहृत्य शोषयित्वा विचूर्ण्य च॥ तिलवत् पीडयेद्द्रोण्यां स्त्रावयेद्वा कुसुम्भवत्। तत्तैलं संहृत्य भूयः पचेदातोयसङ्क्षयात्॥ अवतार्य करीषे च पक्षमात्रं निधापयेत्। स्निग्धः स्विन्नो हृतमलः पक्षादूद्र्ध्वं प्रयत्नवान्॥ चतुर्थभक्तान्तरितः शुक्लादौ दिवसे शुभे। मन्त्रपूतस्य तैलस्य पिबेन्मात्रां यथाबलम्॥ तेनास्योद्र्ध्वमधश्चापि दोषा यान्त्यसकृत्ततः। अस्नेहलवणां सायं यवागूं शीतलां पिबेत्॥ पञ्चाहं प्राशयेत्तैलमनेना विधिना नरः। पक्षं परिहरेच्चापि मुद्गयूषौदनाशनः॥ पञ्चभिर्दिवसैरेवं सर्वकुष्ठैर्विमुच्यते। तदेव खदिरक्वाथे त्रिगुणे साधु साधितम्॥ निहन्ति पूर्ववत् पक्वं पिबेन्मासमतन्द्रितः। तेनाभ्यक्तशरीरश्च कुर्वीताहारमीरितम्॥ भिन्नस्वरं रक्तनेत्रं विशीर्णं कृमिभक्षितम्। अनेनाशु प्रयोगेण साधयेत् कुष्ठिनं नरम्॥ सर्पिर्मधुयुतं पीतं तदेव खदिराम्बुना। पक्षिमांसरसाहारं करोति द्विशतायुषम्॥ तदेव नस्ये पञ्चाशद्दिवसानुपयोजितम्। वपुष्मन्तं श्रुतिधरं करोति त्रिशतायुषम्॥ शोधयन्ति नरं पीता मज्जानस्तस्य मात्रया। महावीर्यस्तुवरकः कुष्ठमेहापहः परः॥ (चि. १३ अ.)। (२) कुष्ठे तुवरास्थीनि–"रसायनप्रयोगेन तुवरास्थीनि शीलयेत्" (चि. १९ अ.)। वाग्भटः।

विविध भाषाओं में नाम–

सं.– अरुष्करः, भल्लातकः, अरुष्कः, अग्निकः, अग्निमुखी, वीरवृक्षः, भल्ली। हि.– भिलामा, भिलाया, भेला, भिलौरा। बं.– भेला, भेलेर गाछ, भेलतुभी। गु.– भिलामा, भियालु। क.– गोडम्बी, करेबीजा, गरेवीजा, गिरु। ते.– चिडिचेट्टू। नालाजीड़ी। द्रा.– सोन कीट्टे। फा.– भिलादर, भिलाडर। अ.– हव्वुल कल्वा। ले.– Cynocardia Odorata.

तुवरक की गुण प्रकाशिका संज्ञा- कुष्ठला।

गुण-दोष–

निघण्टु रत्नाकर के अनुसार- तुवरक रस में उष्ण है तथा पाक में तिक्त रस है। यह कफ विकार, व्रण, क्रिमि रोग, प्रमेह, कुष्ठ रोग तथा ज्वर का नाश करता है। यह आनाह, अर्श तथा शोथ का नाश करता है।

वैद्यक शास्त्र में तुवरक का प्रयोग–

(१) कुष्ठरोग तथा प्रमेह में तुवरक तैल का प्रयोग- पञ्चकर्म कराने के बाद श्रद्धालु तथा जीवन चाहने वाले बुद्धिमान मनुष्य आगे कहे जाने वाले योग से कुष्ठ के रोगी का उपचार करे। जो तुवरक के वृक्ष, पश्चिम समुद्र की भूमि पर है, समुद्र के लहरों के विक्षेप से तथा वायु के झोकों से जिनके पल्लव उड रहे हैं उनके परिपक्व फलों का वर्षा काल के उदय होने पर ग्रहण करे और उन फलों से मज्जा को लेकर तथा सुखाकर चूर्ण बना ले। इसको द्रोणी में रखकर तिल की तरह पीड़ित कर (पेरकर) या कुसुम्भ (वर) की तरह भूधर यन्त्र द्वारा तेल निकाल ले। इसके बाद उस तैल को एकत्र कर पुनः जलीयांश जल जाने तक पका ले। इसके बाद उतार कर गोहरी के मध्य में एक पक्ष तक रक्खे। जब तैल मलरहित स्निग्ध तथा स्विन्न तैल रह जाय तब एक पक्ष के बाद छान कर रख ले। इसके बाद चार दिन उपवास करने के बाद शुक्ल पक्ष की शुभ तिथि तथा दिन में मन्त्र द्वारा अभिमन्त्रित तैल को बल के अनुसार उचित मात्रा में पान करे। इसके पान करने से ऊर्ध्व दोष तथा अधो दोष एक ही बार में शान्त हो जाते हैं। इसके बाद सायंकाल स्नेह तथा लवण से रहित शीतल यवागू पान करे। इस विधि से पांच दिन तक तैल का पान करे और एक पक्ष तक पथ्य पूर्वक रहे और मूंग का यूष तथा भात खाये। इस प्रकार पथ्य पूर्वक तैल सेवन करने से कुष्ठ का रोगी सभी प्रकार के कुष्ठ रोगों से मुक्त हो जाता है। उसी तैल को खैर के तीन गुने क्वाथ में विधि पूर्वक सिद्ध करे और परिपक्व इस तैल को आलस्य रहित होकर पूर्ववत् विधि से पान करे। यह कुष्ठ रोग को नष्ट करता है। इसी तैल का शरीर पर अभ्यंग कर पूर्वोक्त आहार-विहार का सेवन करे। इसके सेवन से क्षीण स्वर, रक्त नेत्र, जीर्ण शीर्ण शरीर तथा क्रिमियों द्वारा भक्षित शरीर वाला कुष्ठ के रोगी को इस प्रयोग से सिद्ध करे। इस प्रकार घृत तथा मधु मिलाकर खदिर के क्वाथ के साथ पान करने से तथा आहार में पक्षियों के मांस रस सेवन करने से कुष्ठ का रोगी दो सौ वर्ष तक जीवित रहता है। इसी तैल को पचास दिन तक नस्य में प्रयोग करने पर स्वच्छ शरीर को प्राप्त कर तथा श्रुतिधर होकर तीन सौ वर्ष जीवित रहता है। तुवरक (भल्लातक) की मज्जा का मात्रा पूर्वक पान करने से मनुष्य को शुद्ध कर देती है। यह महान पराक्रम वाला तुवरक कुष्ठ रोग तथा प्रमेह रोग को नष्ट करता है (वाग्भट, चि.अ.१३)। **(२) कुष्ठ रोग में तुवरास्थि का प्रयोग**- रसायन योग के साथ तुवरक की अस्थि (गुठली) का प्रयोग करे (वाग्भट, चि.अ.१९)।

Constituents—Oleum Gynocardiae, ohaulmogra oil—It is a fixed oil, very bulky, of a sherry wine or brownish colour. The odour is nauseous and peculiar. Dose 2 to 15 ms. The oil deposits on keeping crystalline fat and contains palmitic acid 60 p.c. and therefore solid in cold climates. It contains Gynocardic acid II p.c., the active ingredient; cocinic acid 2.5 p.c. and hypogoeic acid 4 p.c. Both of the latter acids are found either combined with glycerides as fats or in a free state. Gynocardic acid is a fatty acid crystallizes in yellowish flakes, and has an acrid burning taste Dose 1/2 to 2 grs. (R. N. Khory—Part II., p. 56).

Actions and uses—The seeds and oil are alterative and tonic, used to improve the state of

the blood as in leprosy, phthisis, skin diseases, &c. By some the oil is regarded as a specific in leprosy, and, no doubt, in some cases it has very beneficial effects. It is also used in scrofula, secondery syphilis, phthisis and Rheumatism with stiff joints both externally as an inunction or ointment, and internally with mucilage or as capsules or pearls. Gynocardic acid ointment, 15 to 25 grains to an ounce of vaseline is used in herps, tinea, leprosy and other skin affections. It should be given after meals in milk or with Cod-liver oil. (R. N. Khory—art II., p. 57).

त्रायमाणा
Delphinium Zalil

त्रायमाणा–*Delphinium Zalil.*

अन्वर्थसंज्ञा–"गिरिसानुजा"। उत्पत्तिस्थानम्–"हिमवति प्रसिद्धा"। त्रायन्ती कफपित्ता-स्रगुल्मज्वरहरा मता। उष्णा कटुकषाया च सूतिकाशूलनाशिनी॥ रक्तपित्तमच्छर्दिविषघ्नी तिक्तवल्कला। धन्वन्तरीयनिघण्टुः॥ भ्रमतृष्णाक्षयग्लानिविषच्छर्दिविनाशिनी। अन्यच्च–त्रायन्ती शीतमधुरा गुल्मज्वरकफास्त्रनुत्। भ्रमतृष्णाक्षयग्लानिविषच्छर्दिविनाशिनी॥ हिमवति प्रसिद्धा। राजनिघण्टुः॥ त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा। ज्वरहृद्रोगगुल्मास्त्रभ्रमशूलविषप्रणुत्॥ भावप्रकाशः॥ हृद्रोगं रक्तपित्तञ्च दुर्नामानि विनाशयेत्। निघण्टुरत्नाकरः॥ ...त्रायन्ती कफवातनुत्। राजवल्लभः।

वैद्यके व्यवहारः– (१) ज्वरे त्रायमाणा–"...त्रायमाणां वा पयसा ज्वरितः पिबेत्" (चि. ३ अ.)। (२) रक्तपित्ते त्रायमाणा–"त्रायमाणागवाक्ष्योर्वा मूलं...। विरेचनं प्रयुञ्जीत प्रभूतमधुशर्करम्॥" (चि. ४ अ.)। (३) गुल्मे त्रायमाणा–"द्विपलं त्रायमाणाया जलद्विप्रस्थसाधितम्। अष्टभागस्थितं पूतं कोष्णं क्षीरसमं पिबेत्॥ पिबेदुपरि तस्योष्णं क्षीरमेव यथाबलम्। तेन निर्हृते दोषेऽस्य गुल्मः शाम्यति पैत्तिकः॥" (चि. ५ अ.)। (४) पैत्तिकातिसारे त्रायमाणा–"पलाशवत् प्रयोज्या वा त्रायमाणा विशोधिनी" (चि. १० अ.)। (५) विसर्पे त्रायमाणा–"त्रायमाणाशृतं वापि पयो दद्याद्विरेचनम्"। (चि. ११ अ.)। चरकः।

विविध भाषाओं में नाम–

सं.– त्रायमाणा, बलभद्रा। हि.– त्रायमाण, त्रायमान, पखुर। बं.– बलाडुमुर, बालाडुमर। म.– त्रायमाण। गु.– त्राहिमान। क.– चायमाणा, हिमबती, निरामे वल्लि। फा.– अस्प्रका, असफाक। मा.– दत्री। ते.– कलिगा नमु। ले.– Ficus heterophylla (फाइकस हेटरोफीला)।

त्रायमाणा की अन्वर्थज्ञापिका संज्ञा– गिरिसानुजा। **उत्पत्ति स्थान**– हिमालय में प्रसिद्ध है।

गुण-दोष–

धन्वन्तरीय निघण्टु के अनुसार– त्रायन्ती (त्रायमाणा) कफ विकार, पित्त विकार, रक्त विकार, गुल्म रोग तथा ज्वर रोग को दूर करने वाली है। यह उष्ण है, कटु तथा कषाय रस है और सूतिका के शूल का नाश करने वाली है। यह रक्त पित्त तथा वमन एवं विष दोष का नाश करती है और तिक्त वल्कल (छाल) वाली है।

राजनिघण्टु के अनुसार- त्रायमाणा भ्रम, प्यास, क्षय रोग, ग्लानि, विष विकार तथा वमन का नाश करती है। और भी- त्रायमाणा शीतल तथा मधुर है और यह गुल्म रोग, ज्वर, कफ तथा रक्त विकार को दूर करती है। यह भ्रम, प्यास, क्षय रोग, ग्लानि, विष विकार तथा वमन का नाश करती है। यह त्रायमाणा हिमालय में प्रसिद्ध है।

भावप्रकाश के अनुसार- त्रायन्ती कषाय तथा तिक्त रस तथा सारक है और पित्त कफ नाशक है। यह ज्वर, हृदय रोग, गुल्म रोग, रक्त विकार, भ्रम, शूल तथा विष दोष का नाश करती है।

निघण्टु रत्नाकर के अनुसार- त्रायमाण हृदय रोग, रक्त पित्त तथा अर्श रोग को शान्त करती है।

राजवल्लभ के अनुसार- त्रायन्ती, कफ वात को दूर करती है।

वैद्यक शास्त्र में त्रायन्ती का प्रयोग-

(१) ज्वर में त्रायमाणा का प्रयोग- ज्वर से पीड़ित व्यक्ति त्रायमाणा का दूध के साथ पान करे (च.चि.अ.३)। **(२) रक्त पित्त में त्रायमाणा का प्रयोग**- त्रायमाणा या गवाक्षी के मूल का प्रचुर मात्रा में मधु तथा शक्कर मिलाकर विरेचन का प्रयोग करे (च.चि.अ.४)। **(३) गुल्म रोग में त्रायमाणा का प्रयोग**- त्रायमाणा दो पल (१०० ग्रा.), जल दो प्रस्थ (२ किलो) में पाक करे। अष्टमांश शेष रहने पर छान कर थोड़ा गरम-गरम समभाग दूध मिलाकर गुल्म रोग में पान करे। इसके सेवन के बाद अपने बल के अनुसार गरम दूध ही पान करे। इसके प्रयोग से दोषों के शान्त हो जाने पर पैत्तिक गुल्म शान्त होता है (च.चि.अ.५)। **(४) पैत्तिक अतिसार में त्रायमाणा का प्रयोग**- अतिसार रोग में शोधन करने वाली त्रायमाणा को पलाश की तरह प्रयोग करें (च.चि.अ.१०)। **(५) विसर्प में त्रायमाणा का प्रयोग**- विसर्प रोग में त्रायमाणा के साथ पकाया हुआ दूध विरेचनार्थ दें (च.चि.अ.११)।

Actions and uses—A bitter tonic, alterative, anodyne, diuretic and parasiticide. As a tonic it is used in fevers and dyspepsia; as an alterative and diuretic in enlargement of the abdominal viscera as liver and spleen, in jaundice and dropsy. Locally mixed with lime juice the ash is used in parasitic affections of the skin, as scabies, itch, etc. With barley meal a poultice of it is used in inflammatory swellings. (R. N. Khory—Part II., p. 12)

त्रिवृत्

Ipomoea Turpethum, R. Br. Convolvulus Turpethum, Linn.

त्रिवृत्—*Ipomoea turpethum, R. Br., Convolvulus turpethum, Linn.*

पर्यायाः—रक्तायाः—"कालिन्दी", "त्रिपुटा"। श्वेतायाः—"त्रिभण्डी", "त्रिपुटा", "सरला", "सर्वानुभूतिः"। कृष्णायाः—"कालमेषी", "सुषेणी"। अन्वर्थसंज्ञा—रक्तायाः—"ताम्रपुष्पिका", "कुलवर्णा", "मसूरी", "कासनाशिका"। श्वेतायाः—"कुमुदगन्धिनी"। कृष्णायाः—"मालविका", "मसूरविदला"। त्रिवृता (श्यामा) कटुरुष्णा तु कृमिश्लेष्मोदरज्वरान्। शोफपाण्ड्वामयप्लीहान् हन्ति श्रेष्ठा विरचने॥ कषाया मधुरा चोष्णा विपाके कटुका त्रिवृत् (श्वेता)। कफपित्तप्रशमनी रूक्षा चानिलकोपिनी॥ कफपित्तहरा रूक्षा मधुरा बहुरेचनी। वातकृत् कटुका पाके कषाया त्रिवृताऽरुणा॥ धन्वन्तरीयनिघण्टुः॥ त्रिवृत् (श्यामा) तिक्ता कटूष्णा च क्रिमिश्लेष्मोदरार्त्तिजित्। कुष्ठकण्डूव्रणान् हन्ति प्रशस्ता च

विरेचने॥ 'रक्ता' त्रिवृद्रसे तिक्ता कटूष्णा रेचनी च सा। ग्रहणीमलविष्टम्भहारिणी हितकारिणी॥ राजनिघण्टुः॥ 'श्वेता त्रिवृद्रे'चनी स्यात् स्वादुरुष्णा समीरहृत्। रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा॥ 'श्यामा' त्रिवृत्ततो हीनगुणा तीव्रविरेचनी। मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी॥ भावप्रकाशः॥ 'अरुणा त्रिवृता' स्वादुः कषाया मृदुरेचनी। रूक्षा च कटुका चैव पाके तिक्ता कफापहा॥ तस्याश्चाल्पान्तरगुणा विज्ञेया 'त्रिवृता सिता'। ज्वरहृद्रोगवातासृगुदावर्त्तादिरोगनुत्॥ राजवल्लभः॥ विरेचने त्रिवृन्मूलं श्रेष्ठमाहुर्मनीषिणः। कषाया मधुरा रूक्षा विपाके कटुका च सा॥ कफपित्तप्रशमनी रौक्षाच्चानिलकोपनी। मेदानामौषधैर्युक्ता वातपित्तकफापहैः॥ फलवैशिष्यमासाद्य सर्वरोगहरा भवेत्। मूलन्तु द्विविधं तस्याः श्यामञ्चारुणमेव च॥ तयोर्मुख्यतरं विद्धि मूलं यदरुणप्रभम्। सुकुमारे शिशौ वृद्धे मृदुकोष्ठे च तच्छुभम्॥ मोहयेदाशुकारित्वा'च्छ्यामा' कण्ठं क्षिणोत्यपि। तैक्ष्ण्यात् कर्षति हृत्कण्ठमाशु दोषं हरत्यपि॥ शस्यते बहुदोषाणां क्रूरकोष्ठाश्च ये नराः। गुणवत्यां तयोर्भूमौ जातं मूलं समुद्धरेत्॥ गम्भीरानुगतं श्लक्ष्णं न तिर्यग्विसृतञ्च यत्। गृहीत्वा विसृजेत् काष्ठं त्वचं शुष्कां निधापयेत्॥ स्निग्धस्विन्नो विरेच्यस्तु पेयामात्राशितः सुखम्। अक्षमात्रं तयोः पिण्डं विनीयाम्लेन ना पिबेत्॥" दृढबलः (च. क. ७ अ.)।

वैद्यके व्यवहारः– (१) ज्वरे त्रिवृन्मूलम्–"...मृद्वीकानां रसेन वा। त्रिवृतां ज्वरितः पिबेत्॥" (चि. ३ अ.)। (२) रक्तपित्ते त्रिवृन्मूलम्–"त्रिवृतां... विरेचनं प्रयुञ्जीत प्रभूतमधुशर्करम्" (चि. ४ अ.)। (३) अर्शःसु त्रिवृन्मूलम्–"पाययेत त्रिवृच्चूर्णं त्रिफलाया रसेन वा। हृते गुदाश्रये दोषे गच्छन्त्यर्शांसि सङ्क्षयम्" (चि. ९ अ.)। (४) अर्शःसु त्रिवृच्छाकम्–"त्रिवृद्दन्तीपलाशानां...। सुभृष्टं यमके दद्याच्छाकं दधिसरायुतम्॥" (चि. ९ अ.)। (५) विसर्पे त्रिवृन्मूलम्–"त्रिवृच्चूर्णं समालोडच सर्पिषा पयसाऽपि वा। धर्माम्बुना वा संयोज्य मृद्वीकानां रसेन वा॥ विरेकार्थं प्रयोक्तव्यं सिद्धं विसर्पनाशनम्।" (चि. ११ अ.)। (६) पित्तोदरे त्रिवृन्मूलम्–"पयसा सत्रिवृत्कल्केन" (चि. १८ अ.)। (७) गाढपुरीषाय उदररोगिणे त्रिवृच्छाकम्–"शङ्खिनीस्नुक् त्रिवृद्दन्ती...। शाकं गाढपुरीषाय प्राग्भक्तं दापयेद् भिषक्॥" (चि. १८ अ.)। (८) पित्तपाण्डुरुजि त्रिवृन्मूलम्–"द्विशर्करं त्रिवृच्चूर्णं पलार्द्धं पैत्तिकः पिबेत्।' (चि. २० अ.)। चरकः॥ (१) वातशोफे त्रिवृत्तैलम्–"तत्र वातश्वयथौ त्रैवृतमैरण्डतैलं वा मासमर्द्धमासं वा पाययेत्॥" (चि. २३ अ.)। (२) प्रबलज्वरे त्रिवृन्मूलम्–"शान्तिं नयेत् त्रिवृच्चापि सक्षौद्रा प्रबलं ज्वरम्" (उ. ३९ अ.)। (३) गुल्मे त्रिवृन्मूलम्– "पिबेत् त्रिवृन्नागरं वा" (उ. ४२ अ.)। (४) गुल्मे त्रिवृच्छाकम्–"त्रिवृच्छाकेन वा स्निग्धमुष्णं भुञ्जीत भोजनम्" (उ. ४२ अ.)। (५) कामलायां त्रिवृन्मूलम्–"सशर्करा कामलिनां त्रिभण्डी" (उ. ४४ अ.)। सुश्रुतः॥ (१) राजयक्ष्मनि त्रिवृन्मूलम्–"...विरेचनं दद्यात् त्रिवृच्छ्यामानृपद्रुमान्। सर्करामधुसर्पिर्भिः पयसा तर्पणेन वा॥ द्राक्षाविदारीकाश्मर्यमांसानां वा रसैर्युतम्॥" (चि. ५ अ.)। (२) नेत्ररोगे त्रिवृन्मूलम्–"त्रिस्त्रिवृद्वारिणा पक्वं क्षतशुक्रे घृतं पिबेत्" (ब. ११ अ.)। (३) कीटविषे त्रिवृन्मूलम्–"तण्डुलीयकतुल्यांशां त्रिवृतां सर्पिषा पिबेत्" (उ. ३७ अ.)। वाग्भटः॥ (१) सुकुमाराणां रेचनार्थं त्रिवृन्मूलम्–"शर्कराक्षौद्रसंयुक्तं त्रिवृच्चूर्णावचूर्णितम्। रेचनं सुकुमाराणां त्वक्पत्रमरिचांशिकम्॥" (विरेचनाधिकारे)। (२) पित्तविकृतौ त्रिवृन्मूलम्–"छित्वा द्विधेक्षुं परिलिप्य

कल्कैः त्रिभण्डीजातैः परिवेष्टय रज्ज्वा। पक्वन्तु सम्यक् पुटपाकयुक्त्या खादेत्तु तं पित्तगदी सुशीतम्॥" (विरेचनाधिकारे)। चक्रदत्तः॥ विषमज्वरे त्रिवृन्मूलम्–"शान्तिं नयेत्रिवृच्चापि सक्षौद्रा विषमज्वरम्" (ज्वर-चि.) वङ्गसेनः।

विविध भाषाओं में नाम–

सं.– श्वेता– त्रिवृत्, त्रिभण्डी, त्रिवृता, त्रिपुटा, निशोथः। हि.– निशोत, निशोथ, पनिलर। बं.– तेड्डी, तिड्डी, नकषत्तर, पिवोरी। म.– निशोतर तेंड। क.– तिगड़े, तियड़। ते.– आलतेगड़। ता.– शिवदड्। गु.– निशोतर। फा.– निशोत। अ.– तुर्वुद। सं.– श्याम त्रिवृत्– अर्धचन्द्रा, पालिन्दी, सुषणिका। हि.- निशोथ, श्याम पनिलर। बं.– कालतोड़ली। क.– केश्यतेय निगडे। ले.– Ipomoea Turpethum.

त्रिवृत् के पर्याय– रक्तत्रिवृत्– कालिन्दी, त्रिपुटा। **श्वेता त्रिवृत्–** त्रिभण्डी, त्रिपुटा, सरला, सर्वानुभूति। **कृष्णा त्रिवृत्–** कालमेषी, सुषेणी। **त्रिवृत् की अन्वर्थ ज्ञापिका संज्ञा–** रक्ता– ताम्रपुष्पिका, कुलवर्णा, मसूरी, कासनासिका। श्वेता– कुमुदगन्धी, कृष्णा–मालविका, मसूरविदला।

गुण-दोष–

धन्वन्तरीय निघण्टु के अनुसार– श्याम त्रिवृत् कटु रस तथा उष्ण है और यह क्रिमि रोग, कफ विकार, उदर रोग, ज्वर रोग, शोथ, पाण्डु रोग तथा प्लीहा रोग का नाश करता है। यह विरेचन कराने में श्रेष्ठ है। यह कषाय रस, मधुर रस तथा उष्ण है और विपाक में कटु रस है। श्वेता त्रिवृत् कफ तथा पित्त को शान्त करने वाली है, रूक्ष है तथा वात को प्रकुपित करने वाली है। यह कफ तथा पित को दूर करती है, रूक्ष है, मधुर है तथा अधिक रेचन कराने वाली है। यह वात कारक है, पाक में कटु रस है, रक्त त्रिवृत् कषाय रस है।

राजनिघण्टु के अनुसार– त्रिवृत् (निशोथ) तिक्त रस, कटु रस तथा उष्ण है और यह क्रिमि रोग, कफ विकार तथा उदर की पीड़ा को शान्त करती है। यह कुष्ठ रोग, कण्डू तथा व्रण का नाश करती है और विरेचन में प्रशस्त है। रक्त निशोथ रस तिक्त कटु है तथा उष्ण है एवं विरेचक है। यह ग्रहणी रोग तथा मल विबन्ध को दूर करती है तथा हितकर है।

भावप्रकाश के अनुसार– सफेद निशोथ विरेचक, स्वादिष्ट, उष्ण तथा वात नाशक है। यह रूक्ष है तथा पित्त ज्वर, कफ विकार, पित्त विकार तथा शोथ रोग एवं उदर रोग को दूर करती है। श्याम निशोथ सफेद निशोथ की अपेक्षा न्यून गुण वाली है और यह तीव्र विरेचक है। इनके अतिरिक्त यह मूर्च्छा, दाह, मद, भ्रान्ति तथा कण्ठ को उत्कर्षित करने वाली है।

राजवल्लभ के अनुसार– रक्त निशोथ स्वादिष्ट तथा कषाय रस है और यह मृदु विरेचक है, रूक्ष है, कटु रस है तथा पाक में तिक्त रस है और कफ नाशक है। सफेद निशोथ का गुण रक्त निशोथ की अपेक्षा न्यून गुण वाली है। यह ज्वर रोग, हृदय रोग, वात रोग, रक्त विकार तथा उदावर्त आदि रोगों को नष्ट करती है।

दृढ़बल चरक के अनुसार– विद्वान् चिकित्सकों ने निशोथ को उत्तम विरेचक माना है। यह कषाय रस तथा मधुर रस है, रूक्ष है तथा पाक में कटु है। यह कफ विकार तथा पित्त विकार को शान्त करती है तथा रूक्ष होने से वात रोग को प्रकुपित करती है। यह इस समय वात-पित्त तथा कफ नाशक गुण से युक्त है। यह विशेष फल को प्राप्त कर सभी रोगों को दूर करती है। निशोथ मूल दो प्रकार का है– श्याम निशोथ तथा रक्त निशोथ। उन दोनों में रक्त निशोथ मूल अधिक गुणकारक है। इसका प्रयोग सुकुमार व्यक्ति, बालक, वृद्ध

संज्ञा– "कुष्ठहा", "कासमुक्तिदः"। पटोलं कटुकं तीक्ष्णमुष्णं पित्ताविरोधि च। कफासृक्कण्डूकुष्ठानि ज्वरदाहौ च नाशयेत्॥ धन्वन्तरीयनिघण्टुः॥ पटोलः कटुतिक्तोष्णो रक्तपित्तवलासजित्। कफकण्डूतिकुष्ठासृग्ज्वर दाहार्त्तिनाशनः॥ राजनिघण्टुः॥ पटोलं पाचनं हृद्यं वृष्यं लघ्वग्निदीपनम्। स्निग्धोष्णं हन्ति कासास्त्रज्वरदोषत्रयकृमीन्॥ पटोलस्य 'भवेन्मूलं' विरेचनकरं सुखात्। 'नालं' श्लेष्महरं 'पत्रं' पित्तहारि 'फलं' पुनः॥ दोषत्रयहरं प्रोक्तं तद्व'त्तिक्ता पटोलिका'। भावप्रकाशः॥ पटोलं कफपित्तास्त्रव्रणकुष्ठज्वरापहम्। विसर्पनयनव्याधित्रिदोषगरनाशनम्॥ पटोल 'पत्रं' पित्तघ्नं 'नाडी' तस्य कफापहा। 'फलं' तस्य त्रिदोषघ्नं 'मूलम्' तस्य विरेचनम्॥ राजवल्लभः॥ पटोल'पत्रं' विनिहन्ति पित्तं 'नालं' कफघ्नं प्रवदन्ति धीराः। 'फलञ्च' तस्य दोषशान्तिमेव करोति नूनं ज्वरिणो हितं स्यात्॥ हारीतः।

वैद्यके व्यवहारः– (१) 'रक्तपित्ते' पटोलपत्रं–"ह्रीवेरमूलानि पटोलपत्रम्। ...एते समस्ता गणशः पृथग्वा रक्तं सपित्तं शमयन्ति योगाः॥" (चि. ४ अ.)। (२) 'मदात्यये' पटोलस्य वल्ली पत्रञ्च– "...पटोलस्याथवा भिषक्।" (चि. १२ अ.)। (३) 'शोथे' पटोलपत्रम्–"सुवर्च्चिका गृञ्जनकं पटोलं शकार्थिनां शाकमति-प्रशस्तम्।" (चि. १७ अ.)। (४) 'विषदोषे' पटोलशाकम्–"शाकञ्च कुलकं हितं" (चि. २५ अ.)। (५) 'ऊरुस्तम्भे' पटोलशाकम्– "शाकैरलवणैरद्याज्जलतैलोपसाधितैः। कुलकादिभिः...।" (चि. २७ अ.)। चरकः॥ 'रक्तपित्तिनः' शाकार्थं पटोलपत्रम्–"पटोलशेलु... सिन्धुवारम्। हितञ्च शाकं घृतसंस्कृतं सदा।" (उ. ४५ अ.)। सुश्रुतः॥ (१) पित्तश्लेष्म'ज्वरे' पटोलपत्रम्–"निम्बकुलकयूषस्तु पित्तकफात्मके हितः।" (ज्वर–चि.)। (२) 'ज्वरिणः' शाकार्थं पटोलपत्रम्–"पटोलपत्रं... शाकार्थे ज्वरिताय प्रदापयेत्।" (ज्वर–चि.)। (३) 'पित्तज्वरे' पटोलम्– "पटोलयवनिः क्वाथो मधुना मधुरीकृतः। तीव्रपित्तज्वरामर्द्दी पानात्तृड्दाहनाशनः॥ (ज्वर–चि.)। (४) 'वातव्याधौ' पटोलफलम्– "पटोलफलकैर्यूषो वृष्यो वात-हरो लघुः।" (वातव्याधि–चि.)। चक्रदत्तः॥ 'मसूरिकायां' पटोलमूलम्–"पटोलमूलं क्वथितं...। आदावेव मसूर्यान्तु पित्तजायां प्रयोजयेत्।" (म. ख. ४ भागः)। भावप्रकाशः।

पटोलः कतकः (Trichosanthes dioica, Roxb.)

विविध भाषाओं में नाम–

सं.– पटोलः, कूलकः, पाण्डुकः कुष्ठहा, कासभञ्जनः। हि.– परवल, परोरा। बं.– पटोल, पजता, स्वादु पटोल। म.– सोन परवल, पडोल, पडवली। क.– सोमवल्ली, पड़वला। ता.– पुड़लै। ते.– पीटल, केन्यू पोटला। गु.– मीठा पटोला। द्रा.– कोम्बुपुडल। अं.– सेस्पडेला (Sespadela) ले.– ट्राइकोसैन्थस डायोका (Trichosanthes dioica)

गुण एवं दोष–

परिचयज्ञापिका संज्ञा– कर्कशच्छदः, कटुफलः, राजीफलः, पाण्डुफलः। **गुणप्रकाशिका संज्ञा–** कुष्ठहा, कासमुक्तिदः।

धन्वन्तरी निघण्टु के अनुसार– परवल कटुरस, तिक्तरस, तीक्ष्ण तथा उष्ण है और पित्त का अविरोधी है। यह कफ विकार, रक्त विकार, कण्डू, कुष्ठ, ज्वर तथा दाह का नाश करता है।

राजनिघण्टु के अनुसार- पटोल कटुरस, तिक्तरस तथा उष्ण है और रक्त पित्त तथा कफ विकार को दूर करता है। यह कफ, कण्डू, कुष्ठ, रक्त विकार, ज्वर तथा दाह की पीड़ा का नाश करता है।

भावप्रकाश के अनुसार- परवल पाचन है, हृदय को बल देनेवाला है, वीर्यवर्द्धक है, लघु है तथा जाठराग्नि दीपक है। यह स्निग्ध, उष्ण, कास, रक्त विकार, ज्वर, त्रिदोष तथा क्रिमिरोग को नष्ट करता है। परवल का मूल सुख पूर्वक विरेचन कराता है। परवल का नाल श्लेष्म नाशक, पत्र पित्तनाशक तथा फल त्रिदोष नाशक है। उसी प्रकार तिक्त पटोल में भी वही गुण है।

राजवल्लभ के अनुसार- परवल कफ पित्त रक्त विकार, व्रण कुष्ठ तथा ज्वर को दूर करता है और विसर्प, नेत्र रोग, त्रिदोष तथा विष दोष का नाश करता है। परवल का पत्ता पित्त नाशक है। परवल नाल कफ नाशक है, परवल का फल त्रिदोषनाशक है और परवल का मूल विरेचक है।

हारीत संहिता के अनुसार- परवल का पत्ता पित्त को नाश करता है। उसका नाल कफ का नाश करता है, परवल का फल दोषों की शान्ति करता है तथा यह ज्वर के रोगियों के लिए अवश्य हितकर है।

वैद्यक शास्त्र में परवल का प्रयोग-

१. **रक्तपित्त में परवल के पत्ते का प्रयोग**- ह्रीवेर के मूल तथा परवल के पत्ते इनको एक साथ या अलग-अलग प्रयोग करने से ये योग रक्तपित्त को शान्त करते हैं। (च.चि.अ. ४) २. **मदात्यय में परवल की वल्ली तथ पत्र का प्रयोग**- मदात्यय में परवल के पत्ते का प्रयोग करे। (च.चि. अ. १२) ३. **शोथ में परवल के पत्ते का प्रयोग**- सुवर्चिका, गाजर तथा परवल का शाक शाक खानेवाले लोगों के लिए प्रशस्त है। (च.चि.अ.१७) ४. **विषदोष में परवल का शाक**- विषदोष में परवल का शाक हितकर है। (च.चि.अ. २५) ५. **उरुस्तम्भ में परवल का शाक**- परवल आदि का शाक जल तथा तैल पकाकर विना नमक मिलाये उरुस्तम्भरोग में खिलाये। (च.चि.अ. २७)

रक्तपित्त के रोगियों के लिए परवल के शाक का प्रयोग- परवल शेलु (श्लेष्मान्तक) तथा सिन्धुवार का शाक घृत में पकाकर देना रक्त पित्त रोगियों के लिए सर्वथा हितकर है। (सु.उ.अ. ४५)

१. **पित्तश्लेष्म ज्वर में पटोलपत्र का शाक**- पित्त कफ ज्वर में नीम पत्र तथा परवल के पत्ते का यूष हितकर है। (चक्र. ज्वर चि.) २. **ज्वररोगी के लिए परवल के शाक का प्रयोग**- परवल के पत्ते का शाक ज्वर के रोगी के लिए दे। (चक्र.ज्वर चि.) ३. **पित्त ज्वर में परवल का प्रयोग**- परवल तथा यव का क्वाथ मधु के साथ मीठा बनाकर भयंकर पित्तज्वर से पीड़ित व्यक्ति के लिए पीने को दे। यह पान करने से प्यास तथा दाह का नाश करता है। (चक्र. ज्वर चि.) ४. **वातव्याधि में परवल के फल का प्रयोग**- परवल के फल का यूष वीर्यवर्द्धक तथा वातनाशक है। (चक्र. वातव्याधि चि.)

मसूरिका में परवल के मूल का प्रयोग- परवल के मूल का क्वाथ पित्तज मसूरिका उत्पन्न होने के पहले ही पान कराये। (भाव. म. ख. अ. ४)

पद्मम्

पद्मम्, कमलम्। Nelumbium Speciosum.

उत्पलानि कषायानि रक्तपित्तहराणि च। कुमुदोत्पल'नालास्तु' सुपुष्पाः सफला स्मृताः॥ शीताः स्वादुकषायास्तु कफमारुतकोपनाः। कषायमीषद्विष्टम्भि रक्तपित्तहरं स्मृतम्॥ पौष्करन्तु

'भवेद्बीजं' मधुरं रसपाकयोः। चरकः॥ सतिक्तं मधुरं शीतं 'पद्मं' पित्तकफापहम्। मधुरं पिच्छिलं स्निग्धं 'कुमुदं' ह्लादि शीतलम्॥ तस्मादल्पान्तरगुणे विद्यात् 'कुवलयोत्पले'। सुश्रुतः। 'पुण्डरीकं' हिमं तिक्तं मधुरं पित्तनाशनम्। दाहघ्नमस्त्रशोषघ्नं पिपासाभ्रमनाशनम्॥ धन्वन्तरीयनिघण्टू राजनिघण्टुश्च। 'नीलाब्जं' शीतलं स्वादु सुगन्धि पित्तनाशनम्। रुच्यं रसायने श्रेष्ठं देहदार्ढ्यञ्च केशदम्॥ धन्वन्तरीयनिघण्टू राजनिघण्टुश्च। पाके 'रक्तोत्पलं' शीतं तिक्तञ्च मधुरं रसे। भिनत्ति पित्तसन्तापौ ध्वंसयत्यस्त्रजां रुजम्॥ धन्वन्तरीयनिघण्टुः॥ 'कोकनदं' कटु तिक्तं मधुरं शिशिरं च रक्तदोषघ्नम्। पित्तकफवातशमनं सन्तर्पणकारणं वृष्यम्॥ 'कमलं' शीतलं स्वादु रक्तपित्तश्रमार्त्तिनुत्। सुगन्धि भ्रान्तिसन्तापशान्तिदं तर्पणं परम्॥ राजनिघण्टुः। 'कुमुदं' शीतलं स्वादु पाके तिक्तं कफापहम्। रक्तदोषहरं दाहश्रमपित्तप्रशान्तिकृत्॥ धन्वन्तरीयनिघण्टू राजनिघण्टुश्च। 'उत्पलिनी' हिमतिक्ता रक्तामयहारिणी च पित्तघ्नी। तापकफकासतृष्णाश्रमवमिशमनी च विज्ञेया॥ राजनिघण्टुः। 'पद्मिनी शिशिरा रूक्षा कफपित्तहरा स्मृता। धन्वन्तरीयनिघण्टुः। 'पद्मिनी' मधुरा तिक्ता कषाया शिशिरा परा। पित्तकृमिशोषवान्तिभ्रान्तिसन्तापशान्तिकृत्॥ राजनिघण्टुः॥ स्वादु तिक्तं 'पद्मबीजं' गर्भस्थापनमुत्तमम्। रक्तपित्तप्रशमनं किञ्चिन्मारुतकृद्भवेत्॥ धन्वन्तरीयनिघण्टुः॥ 'पद्मबीजं' कटु स्वादु पित्तच्छर्द्दिहरं परम्। दाहास्त्रदोषशमनं पाचनं रुचिकारकम्॥ राजनिघण्टुः॥ अविदाहि 'बिसं' प्रोक्तं रक्तपित्तप्रसादनम्। विष्टम्भि मधुरं रूक्षं दुर्जरं वातकोपनम्॥ धन्वन्तरीयनिघण्टुः॥ 'मृणालं' शिशिरं तिक्तं कषायं पित्तदाहजित्। मूत्रकृच्छ्रविकारघ्नं रक्तवान्तिहरं परम्॥ राजनिघण्टुः॥ 'पद्मकन्दः' कषायः स्यात् स्वादे तिक्तो विपाकतः। शीतवीर्योऽस्त्रपित्तोत्थरोगभङ्गाय कल्पते॥ धन्वन्तरीयनिघण्टुः॥ 'शालूकं' कटु विष्टम्भि रूक्षं रुच्यं कफापहम्। कषायं कासपित्तघ्नं तृष्णादाहनिवारणम्॥ राजनिघण्टुः। तृषाघ्नं शीतलं रूक्षं पित्तरक्तक्षयापहम्। 'पद्मकेसर'मेवोक्तं पित्तघ्नं सकषायकम्॥ धन्वन्तरीयनिघण्टुः॥ 'किञ्जल्कं' मधुरं रूक्षं कटु चास्यव्रणापहम्। शिशिरं रक्तपित्तघ्नं तृष्णादाहनिवारणम्॥ राजनिघण्टुः॥ 'संवर्त्तिका' (नवदलं) हिमा तिक्ता कषाया दाहतृट्प्रणुत्। मूत्रकृच्छ्रगुदव्याधिरक्त-पित्तविनाशनी॥ पद्मस्य 'कर्णिका' (बीजकोषः) तिक्ता कषाया मधुरा हिमा। मुखवैशद्यकृल्लघ्वी तृष्णास्त्रकफपित्तनुत्॥ भावप्रकाशः।

वैद्यके व्यवहारः–(१) 'रक्तपित्ते' उत्पलादिकिञ्जल्कम्–"उत्पलकुमुदपद्मकिञ्जल्कं सङ्ग्राहकरक्तपित्तप्रशमनानाम्।" (सू. २५ अ.)। (२) 'रक्तपित्ते' मृणालम्–"दुरालभापर्पटकामृणालम्... एते समस्ता गणशः पृथग्वा। रक्तं सपित्तं शमयन्ति योगाः।" (चि. ४ अ.)। (३) 'मूत्रकृच्छ्रे' कमलम्–"पिबेत् कषायं कमलोत्पलानाम्।" (चि. २६ अ.)। चरकः॥ 'रक्तार्शःसु पद्मकिञ्जल्कम्–"शर्कराम्भोजकिञ्जल्कसहितं सह वा तिलैः। अभ्यस्तं रक्तगुदजान् नवनीतं नियच्छति।" (चि. ८ अ.)। वाग्भटः॥ 'गुदनिर्गमे' पद्मिनीपत्रम्–"कोमलं पद्मिनीपत्रं यः खादेच्छर्करान्वितम्। एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः॥" (क्षुद्ररोग–चि.)। चक्रदत्तः॥ (१) 'ज्वरातिसारे' पद्मकेसरः– "उत्पलं दाडिमत्वक् च पद्मकिञ्जल्कमेव च। पीतं तण्डुलतोयेन ज्वरातिसारनाशनम्।" (म. ख. अतिसारचि.)। (२) 'शूकरदंष्ट्रोद्भूतज्वरे' पद्ममूलम्–"राजीवमूलकल्कः पीतो गव्येन सर्पिषा प्रातः। शमयति शूकरदंष्ट्रोद्भूतं ज्वरं घोरम्॥" (म. ख. ४ भा.)। भावप्रकाशः॥ (१)

'मुखप्रवृत्ते रुधिरे' पद्मकिञ्जल्कम्– "पद्मकिञ्जल्कचूर्णंवा लिह्याद्वा सितया पुनः। मुखप्रवृत्तरुधिरं रुणद्ध्याशु..."। (चि. ११ अ.)। (२) 'मूत्रनिरोधे' पद्मकन्दः– "तैलेन पद्मिनीकन्दं पक्वं गोमूत्रमिश्रितम्। पिबेन्मूत्रनिरोधे तु सतीव्रवेदनान्विते।" (चि. ३० अ.)। हारीतः।

पद्ममम्, कमलम् (Nelumbium speciosum)

विविध भाषाओं में नाम–

सं.– पद्मम्, नलिनम्, अरविन्दम्। हि.– कमल, पुरइन। बं.– पद्म। म. गु.– कमल। रू.– विलियारावरे। ते.– कलावा। ता.– तावरे अम्बल। अ.– कम्बुलमा। अं.– लोटस (Lotus)। ले.– नेलुम्बिअम स्पेसीओजम (Nelumbium speciosum)।

कमल के भेद

चरक के अनुसार १. श्वेत कमल, २. रक्तकमल ३. नील कमल।

सुश्रुत के अनुसार १. पद्मम् २. उत्पलम् ३. नलिनम् ४. कुमुदम् ५. सौगन्धिकम् ६. कुवलयः ७. पुण्डरीकम्।

गुण एवं दोष–

चरक के अनुसार– उत्पल (कमल) कषाय रस है तथा रक्त पित्त को दूर करनेवाला है। कुमुद उत्पल का नाल पुष्प तथा फल के साथ शीतल स्वादिष्ट तथा कषायरस है और ये कफ तथा वात को प्रकुपित करते हैं। यह कषाय रस थोड़ा विष्टम्भकारक तथा रक्तपित्तकर कहा गया है।

सुश्रुत के अनुसार– कमल तिक्तरस मधुर तथा शीतल है पद्म पित्त तथा कफ नाशक है, मधुर है, पिच्छिल है तथा स्निग्ध है। कुमुद आह्लादकारक तथा शीतल है। कुवलय तथा उत्पन्न कुमुद के गुणों से कम गुणवाले हैं।

धन्वन्तरी निघण्टु – राजनिघण्टु के अनुसार– पुण्डरीक शीतल, तिक्तरस तथा मधुर रस है और पित्त नाशक है। यह दाहनाशक, रक्त विकार तथा शोथ नाशक एवं पिपासा तथा श्रम शामक है। नील कमल शीतल, स्वादिष्ट तथा सुगन्धि है और पित्त नाशक है, रुचिकारक है, रसायन कार्य में श्रेष्ठ है, शरीर को दृढ बनाता है और केश को बढ़ाता है।

धन्वन्तरी निघण्टु के अनुसार– रक्त कमल पाक में शीतल है, रस में तिक्त तथा मधुर रस है। यह पित्त तथा सन्ताप को तथा रक्त विकार एवं पीड़ा को नष्ट करता है।

राजनिघण्टु के अनुसार– कोकनद (कमल) कटुरस, तिक्तरस तथा मधुररस है तथा शीतल है और रक्तदोषनाशक है। यह पित्त-कफ तथा वात शामक है, संतर्पणकारक है एवं वीर्य वर्द्धक है। कमल शीतल तथा स्वादिष्ट है और रक्त पित्त तथा श्रम की पीडा को दूर करता है। यह सुगन्धित है तथा भ्रान्ति एवं सन्ताप को शान्त करता है और उत्तमतर्पण (तृप्तिकारक) है।

धन्वन्तरी – राजनिघण्टु के अनुसार– कुमुद शीतल, स्वादिष्ट पाक में तिक्तरस तथा कफ को दूर करनेवाला है। यह रक्त विकार को दूर करता है, दाह, श्रम तथा पित्त विकार को शान्ति करता है।

राजनिघण्टु के अनुसार– उत्पलिनी (कमलिनी) शीतल तथा तिक्तरस है और रक्तज रोग को दूर करती है तथा पित्त का नाश करती है। यह ताप, कफ विकार, रक्त विकार, प्यास, श्रम तथा वमन को शान्त करती है।

धन्वन्तरी निघण्टु के अनुसार– पद्मिनी शिशिर तथा रूक्ष है और कफ विकार एवं पित्तविकार को दूर करती है।

राजनिघण्टु के अनुसार- पद्मिनी मधु तिक्तरस, कषाय रस तथा अधिक शीतल है। यह पित्तविकार, क्रिमि रोग, शोथ, वमन भ्रान्ति तथा सन्ताप को शान्त करती है।

धन्वन्तरी निघण्टु के अनुसार- पद्म (कमल) का बीज स्वादिष्ट तथा तिक्तरस है और यह उत्तम गर्भ स्थापक है। यह रक्तपित्त को शान्त करता है तथा थोड़ा वायु को प्रकुपित करता है।

राजनिघण्टु के अनुसार- पद्म बीज, कटु तथा स्वादिष्ट है और पित्तज छर्दि को अच्छी तरह दूर करता है। यह दाह तथा रक्त विकार शान्त करता है और पाचन एवं रुचिकारक है।

धन्वन्तरी निघण्टु के अनुसार- कमल का बिस (तन्तु) अविदाही कहा गया है तथा रक्त पित्त को शान्त करता है। यह विष्टम्भी है, मधुर है, रूक्ष है, दुष्पच्य है तथा वातप्रकोपक है।

राजनिघण्टु के अनुसार- कमल मृणाल (तन्तु) शीतल, तिक्तरस तथा कषायरस है और पित्त विकार तथा दाह को शान्त करता है। यह मूत्रकृच्छ्र विकार का नाश करता है और रक्त विकार एवं वमन को अच्छी तरह दूर करता है।

धन्वन्तरी निघण्टु के अनुसार- पद्मकन्द (भिषोड़) स्वाद में कषाय रस है तथा विपाक में तिक्त रस है। यह शीतवीर्य है तथा रक्त पित्त से उत्पन्न उपद्रवों का नाश करनेवाला कहा गया है।

राजनिघण्टु के अनुसार- कमल शालूक, कटुरस, विष्टम्भि, रूक्ष, रुचिकारक तथा कफनाशक है। यह कषाय रस है, कास एवं पित्त नाशक है तथा प्यास एवं दाह निवारक है।

धन्वन्तरी निघण्टु के अनुसार- पद्मकेशर ही तृषानाशक, शीतल, रूक्ष तथा पित्त विकार, रक्तविकार एवं क्षयरोग का नाश करता है। यह कषाय रसवाला पित्त विकार नाशक है।

राजनिघण्टु के अनुसार- किंजल्क (पद्मकेशर), मधुर, रूक्ष, कटुरस, तथा मुख के व्रण का शोधन करता है। यह शीतल है, रक्तपित्त नाशक है तथा प्यास एवं दाह का निवारण करता है।

भावप्रकाश के अनुसार- संवर्तिका (कमल का नवदल) शीलत, तिक्तरस तथा कषाय रस है और यह दाह एवं प्यास को दूर करती है। यह मूत्रकृच्छ्र, गुदव्याधि (अर्शरोग) तथा रक्त पित्त का नाश करती है। पद्मकी कर्णिका (बीज कोष), तिक्तरस कषायरस, मधुर तथा शीतल है। यह मुख को साफ करती है और लघु है तथा प्यास, रक्त विकार, कफ विकार एवं पित्त विकार को दूर करती है।

वैद्यकशास्त्र में उत्पलादि कमल का प्रयोग-

१. रक्तपित्त में उत्पलादि (कमल आदि) के किञ्जल्क (पद्मकेसर) का प्रयोग- उत्पल कुमुद तथा कमल का किञ्जल्क (पद्म केसर) ग्राहक रक्तपित्त का शमन करनेवाला है। (च.मू.अ.२५) **२. रक्तपित्त में मृणाल (कमलनाल) का प्रयोग**- दुरालभा (यवास), पित्तपापड़ा तथा मृणाल (कमलनाल) एक साथ या अलग-अलग प्रयोग करने से ये योग रक्त पित्त को शान्त करते हैं। (च.चि.अ. ४) **३. मूत्रकृच्छ्र में कमल का प्रयोग**- कमल तथा उत्पल कमल का कषाय रक्तपित्त में पान करे। (च. चि. अ. २६)

रक्तार्श में पद्मकिंजल्क (कमलकेसर) का प्रयोग - शक्कर तथा कमल का केसर तिल के साथ नवनीत (मक्खन) मिलाकर खाने से गुदज (अर्श) रोगों को दूर करता है। (वाग्भट चि. अ. ८)

गुदा के बाहर निकलने पर पद्मिनी पत्र का प्रयोग- कमलिनी के कोमल पत्तों को शक्कर के साथ जो व्यक्ति खाता है उसका गुदा बाहर नहीं निकलता है ऐसा निश्चित है। (चक्र. क्षुद्र रोगाधिकार)

१. ज्वरातिसार में पद्मकमल का प्रयोग- उत्पल (कमल) अनार का छाल तथा किञ्जल्क (पद्मकेसर) इन सब का चूर्ण चावल के धोवन के साथ पान करने से ज्वरातिसार का नाश करता है। (भा. प्र. म. ख. अतिसार चि.) २. शूकर दंष्ट्रोद्भूत ज्वर में पद्ममूल का प्रयोग- राजीव (कमल) मूल का कल्क गाय के घी के साथ प्रातः पान करने से सूअर के दांत के काटने से उत्पन्न भयंकर ज्वर शान्त होता है। (भा. प्र. म. ख. अ. ४)

१. मुख से रक्त के निकलने पर पद्मकिञ्जल्क का प्रयोग- पद्मकिञ्जल्क (पद्मकेसर) का चूर्ण मिश्री के साथ चाटे। यह मुख से निकलते हुए रक्त को शीघ्र ही रोकता है। (हारीत चि. अ. ११) २. मूत्रावरोध में पद्मकन्द का प्रयोग- पद्मिनी कन्द (भिषोड़) को तैल के साथ पकाकर तथा गोमूत्र मिलाकर तीव्र वेदनायुक्त मूत्र निरोध में पान करे। (हारीतः चि. अ. ३०)

Constituents—The rhizome and seeds contain resins, glucose, meterabin, tannin, fat and an alkaloid similar to nupharine identical with that obtained from nupharluteum. (*Materia Medica of India* II, p. 39). **Actions and uses**—The seeds are demulcent and nutritive; the filaments and flowers are cooling, astringent, bitter, and expectorant. Syrup of flowers are used in coughs, to check haemorrhage from bleeding piles, in sanguineous fluxes from the bowels and in menorrhagia. The lotus flowers and fresh leaves with sandal wood or emblic myrobalans are used as a cooling application to the forehead in cephalalgia, to the skin in erysipelas and to other external inflamations. A cooling bed sheet made to kamala is used for fever patients with high fever. The seeds with those of Euryale ferox (Makhanna) are used as an article of diet. The starch contained in the rhizome when collected, constitutes a sort of arrowroot known to Chinese as Ghaanfeen. The powder of the seeds kamarkakri is known by the name of Bhesabola. These two products come from Shanghai, and are largely used by native women as a demulcent in leucorrhoea. (R. N. Khory—II. p. 39).

पद्मकम्

पद्मकम्, पद्मकाष्ठम्। Prunus Pudum, Roxb.

परिचयज्ञापिका संज्ञा–"पीतरक्तः" "पाटलापुष्पवर्णकः", "पद्मगन्धि"। उत्पत्तिबोधिका संज्ञा–"मालयम्" "केदारजम्"। पद्मकं शिशिरं स्निग्धं कषायं रक्तपित्तनुत्। गर्भस्थैर्यकरं प्रोक्तं ज्वरच्छर्दिविषापहम्॥ मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटशान्तकृत्। पद्मकं शीतलं तिक्तं रक्तपित्त-विनाशनम्॥ धन्वन्तरीयनिघण्टू राजनिघण्टूश्च॥ पद्मकं तुवरं तिक्तं शीतलं वातलं लघु। विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत्॥ गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत्। भावप्रकाशः॥

वैद्यके व्यवहारः–'रक्तपित्ते' पद्मकम्–"उशीरकालीयकलोध्रपद्मक...। पृथक् पृथक् चन्दनतुल्यभागिकाः। सशर्करास्तण्डुलधावनाप्लुताः रक्तं सपित्तं शमयन्ति सद्यः।" (चि. ४ अ.)। चरकः॥ 'हिक्काश्वासयोः' पद्मकम्–"...पद्मकं वा घृतप्लुतं" (चि. ४ अ.)। वाग्भटः।

पद्मकम्, पद्मकाष्ठम् - Prunus pudum, Roxb.

विविध भाषाओं में नाम-

सं.- पद्मकम्, पद्मकाष्ठम्। हि.- पद्माख, पद्मकाठ। बं.- पद्मकाठ। म.- पद्मकाष्ट, पद्मक। गु.-

पद्मकतूलाकडु, पद्मकाठी। ते.- एण्डण्डा सहदेवि, पद्मपेचुक्का, पद्मप्रचिवक। ले.- प्रूनुस पदुम (Prunus pudum)। अं.- हिमालयन चेरी (Himalayan Cherry)।

परिचयज्ञापिका संज्ञा - पीतरक्तः, पाटलापुष्पवर्णकः, पद्मगन्धिः। **उत्पत्ति बोधिका संज्ञा**- मालयम्, केदारजम्।

गुण एवं दोष-

धन्वन्तरी निघण्टु, राजनिघण्टु के अनुसार- पद्मक (पद्मकाठ) शीतल, स्निग्ध तथा कषाय रस है और रक्तपित्त को दूर करता है। यह गर्भ को स्थिर करता है तथा ज्वर, वमन एवं विषविकार का नाश करता है। यह मोह, दाह, ज्वर, भ्रम, कुष्ठरोग तथा विस्फोट को शान्त करता है। पद्मक शीतल तथा तिक्तरस है और रक्तपित्त का नाश करता है।

भावप्रकाश के अनुसार- पद्मक (पद्मकाठ) कसैला, तिक्तरस, शीतल, वातकारक तथा लघु है और यह विसर्प, दाह, विस्फोटक, कुष्ठरोग, कफ विकार, रक्त विकार तथा पित्त विकार को दूर करता है।

वैद्यक शास्त्र में पद्मक का प्रयोग-

रक्तपित्त में पद्मक का प्रयोग- श्वास, कालीयक (पतंग), लोध तथा पद्मकाठ इन सब को अलग-अलग चन्दन के बराबर भाग लेकर चूर्ण बना ले और समान भाग शक्कर मिलाकर चावल के धोअन के साथ पान करे। यह शीघ्र ही रक्तपित्त को शान्त करता है। (च.चि.अ.४)

हिक्का, श्वास में पद्मक का प्रयोग- पद्मक को घृत से लिप्त कर तथा उसको जलाकर उसका धूम ग्रहण करने से हिक्का तथा श्वास शान्त होता है। (वाग्भट चि. अ. ४)

Constituents—Amygdalin. **Actions and uses**—The bark is used as a bitter tonic and sedative. It is given during convalescence from acute diseases and in palpitation of the heart. (*Materia Medica of India*—II p. 244).

परूषकम्

परूषकम्, परूषम्। Grewia Asiatica, Linn.

परिचयज्ञापिका संज्ञा–"नीलवर्णम्" "मृदुफलम्" "अल्पास्थि"। परूषकं फलं चाम्लं वातघ्नं पित्तकृद् गुरु। तदेव 'पक्वं' मधुरं वातपित्तनिर्व्हणम्॥ धन्वन्तरीयनिघण्टुः॥ परूषमम्लं कटुकं कफार्त्तिजिद्॥ वातापहं तत् 'फलमेव' पित्तद॥ सोष्णं च पक्वं मधुरं रुचिप्रदम्। पित्तापहं शोफहरञ्च पीतम्॥ राजनिघण्टुः॥ परूषकं कषायाम्ल'मामं' पित्तकरं लघु। तत्-'पक्वं' मधुरं पाके शीतं विष्टम्भि वृंहणम्॥ हृद्यन्तु पित्तदाहास्त्रज्वरक्षयसमीरहृत्। भावप्रकाशः।

वैद्यके व्यवहारः–'मदात्ययस्य पिपासायां' परूषकम्–"परूषकानां पीलूनां रसं...॥" (चि. १२ अ.)। चरकः॥ 'रोहिणी'नामकगलरोगे परूषकम्–"...कवलो द्राक्षापरूषैः क्वथितो हितः॥" (म. ख. ४ भा.)। भावप्रकाशः।

विविध भाषाओं में नाम-

सं- परूषकम्, परायरम, अल्पास्थि। हि.- फालसा परूषा, फलहे। बं.- परूष, फलसा। म.- पर्पका। क.-

वेहहा, दागल। ते.- पुटिकी चिहिद। गु.- घ्रामण। भा.- फालायः। फा.- पालसा। अ.- फालसह। ले.- ग्रीविया एसियाटिका।

परिचय ज्ञापिका सं.- नीलवर्णम्, मृदुफलम्, अल्पास्थि।

गुण एवं दोष-

धन्वन्तरीय निघण्टु के अनुसार- परूषक (फालसा) का फल अम्लरस है तथा वातनाशक है, पित्तकारक है एवं गुरु है। वही परुषक फल पक जाने पर मधुररस है तथा वात पित्त को दूर करता है।

राजनिघण्टु के अनुसार- परूषक अम्ल रस तथा कटु रस है और कफज पीड़ा को दूर करता है। यह वात शामक है और परुषक का फल पित्तकारक है। पका हुआ परूषक फल उष्ण है, मधुर रस है तथा रुचिप्रद है। यह पित्तनाशक है तथा पान करने से शोथहर है।

भावप्रकाश के अनुसार- आम परूषक कषाय रस तथा अम्ल रस, पित्तकारक तथा लघु है। वह पका हुआ परूषक फल पाक में मधुर है, शीतल है, विष्टम्भकारक है तथा मांसवर्द्धक है। यह हृदय को बल देनेवाला है तथा पित्त विकार, दाह, रक्त विकार, ज्वर, क्षय रोग तथा वात विकार को दूर करता है।

वैद्यक शास्त्र में परूषक का प्रयोग-

मदात्यय की प्यास में परूषक का प्रयोग- मदात्यय जन्य प्यास में परूषक तथा पीलू फल का रस लाभदायक है। (च.चि.अ.१२)।

रोहिणी नामक गले के रोग में परूषक का प्रयोग- मुनक्का तथा परूषक के फल का क्वाथ रोहिणी नामक गले के रोग में कवल धारण करना हितकर है। (म. ख. ४ भा. प्र.)।

Actions and uses—Cooling refrigerant; the bark is demulcent, and given in fever and dysentery. (R. N. Khory—II. p. 88).

पर्पटकः

पर्पटः। Oldenlandia herbacea, D.L.O. biflora, Roxb.

पर्पटः शीतलस्तिक्तः पित्तश्लेष्मज्वरापहः। रक्तदाहारुचिग्लानिमदभ्रमविनाशनः॥ धन्वन्तरीय-निघण्टू राजनिघण्टुश्च॥ पर्पटो हन्ति पित्तास्त्रभ्रमतृष्णा-कफज्वरान्। सङ्ग्राही शीतकस्तिक्तो दाहनुद्वातलो लघुः॥ भावप्रकाशः॥ पर्पटो पित्तहृद्दाहज्वरजित् कफशोषणः। राजवल्लभः॥

वैद्यके व्यवहारः– (१) 'रक्तपित्ते' पर्पटः–"दुरालभापर्पटकमृणालम्। ...एते समस्ता गणशः पृथग्वा रक्तं सपित्तं शमयन्ति योगाः॥" (चि. ४ अ.)। (२) 'अतिसारे' पर्पटः–"...मुस्तपर्पटकेन" (चि. १० अ.)। (३) 'मदात्यये' पर्पटः–"मुस्तपर्पटकेन वा–" (चि. १२ अ.)। चरकः॥ (१) 'ज्वरिणः' शाकार्थं पर्पटः–कर्कोटकं पर्पटकं...। ...शाकार्थे ज्वरिताय प्रदापयेत्" (ज्वर-चि.)। (२) 'पित्तज्वरे' पर्पटः–"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।" (ज्वर-चि.)। (३) 'वमने' पर्पटः–"क्वाथः पर्पटजः पीतः सक्षौद्रश्छर्द्दिनाशनः।" (छर्द्दि-चि.)। चक्रदत्तः।

विविध भाषाओं में नाम-

सं.- पर्पटः, वरतिक्तः। हि.- पित्तपापड़ा, शहतरा, दमन पापड़ा, पन पप्पड़। बं.- श्वेत पापड़ा, वनसुलफा।

म.- सिरपटी। ता.- तुरा। गु.- पित पापड़ो, क्षेत्र पर्पट। क.- पर्पाटक। फा.- भ्याहतरा। अ.- वफलतल मलीज, शाहतरज। अं.- जस्टिली प्रेकेरेवेन्स। ले.- फ्यूमोरिया पर वी फ्लोरा।

गुण एवं दोष-

धन्वन्तरीय निघण्टु, राज निघण्टु के अनुसार- पर्पट (पित्त पापड़ा), शीतल तथा तिक्त रस है तथा पित्त विकार, कफ विकार तथा ज्वर को दूर करता है। यह रक्त विकार, दाह, अरुचि, ग्लानि, मद (मदात्यय) तथा भ्रम का नाश करता है।

भाव प्रकाश के अनुसार- पित्त पापड़ा पित्त विकार, रक्त विकार, भ्रम, प्यास, कफ विकार एवं ज्वर को नष्ट करता है। यह ग्राही है, शीतल है, तिक्त रस है तथा दाह नाशक है, वातकारक है और लघु है। **राजवल्लभ के अनुसार-** पित्त पापड़ा पित्त हर, दाह तथा ज्वर शामक एवं कफ शोषक है।

वैद्यक शास्त्र में पित्त पापड़ा का प्रयोग-

(१) रक्त पित्त में पित्त पापड़ा का प्रयोग- दुरालभा (यवासा) पित्त पापड़ा तथा कमल मृणाल इन सब को एक साथ या अलग-अलग प्रयोग करने से ये योग रक्तपित्त को शान्त करते हैं। (च.चि.अ.४)। (२) **अतिसार में पित्त पापड़ा का प्रयोग-** नागरमोथा तथा पित्त पापड़ा का क्वाथ या चूर्ण अतिसार का नाश करता है। (चि.चि.अ.१०) (३) **मदात्यय में पर्पट का प्रयोग-** नागरमोथा तथा पित पापड़ा का प्रयोग मदात्यय में करे। (च.चि.अ.१२)।

(१) ज्वर रोगियों के शाक के लिए पर्पटक का प्रयोग- कर्कोटक (च.अ.) तथा पित्त पापड़ा का शाक ज्वर के रोगी को खिलाये। (चक्र. ज्वर चि.)। (२) **पित्त ज्वर में पर्पटक का प्रयोग-** पित्त ज्वर का नाश करने के लिए एक ही पित्त पापड़ा श्रेष्ठ है। (चक्र. ज्वर चि.)। (३) **वमन में पर्पटक का प्रयोग-** पित्त पापड़ा का क्वाथ मधु के साथ पान करने से वमन का नाश करता है। (चक्र. छर्दि चि.)।

Chemical Composition—A watery extract of this plant gave coloured precipitates with alkalies, a green reaction with ferric chloride, none with gelatin or acids, an abundant cream cloured precipitate with lead acetate, and afforded indications of an alkaloid. A watery solution of an alcholic extract had similar properties; it was mawkish and saline to the taste, and when evaporated to dryness it formed a mass of cubical, deliquescent crystals. A portion of this extract ignited left a saline residue consisting of Potassium, Sodium, and a small quantity of Calcium, mostly existing as chlorides. No ammonia was detected in the herb, and the alkaloid was shaken out of an alkaline solution with ether, but had no very characteristic reaction. The value of the plant as a cooling medicine no doubt is due to the inorganic salts present. The dried herb left an unusuallylarge incombustible residue, amounting to 22 p.c., very soluble in water. (Pharmacograhia India, II, 129)

पलाण्डुः

पलाण्डुः। Allium Cepa, Linn.

गुणप्रकाशिका संज्ञा- दुर्गन्धः, मुखदूषकः। श्लेष्मलो मारुतघ्नश्च पलाण्डुर्न च पित्तहृत्। आहारयोगी बल्यश्च गुरुर्बल्योऽथ रोचनः॥ चरकः (सू. २७ अ.)। बलावहः पित्तकरोऽथ किञ्चित्

पलाण्डुरग्निञ्च विवर्द्धयेच्च। स्निग्धो रुचिस्थः स्थिरधातुकर्त्ता बल्योऽथ मेधाकफपुष्टिदश्च॥ स्वादुर्गुरुः शोणित-पित्तशस्तः स पिच्छिलः 'क्षीरपलाण्डुरुक्तः'। सुश्रुतः (सू. ४६ अ.)। पलाण्डुस्तद्‌गुणन्यूनः श्लेष्मलो नातिपित्तलः। कफवातार्शसां पथ्यः स्वेदेऽभ्यवहृतौ तथा॥ वाग्भटः (सू. ६ अ.)। पलाण्डुस्तद्‌गुणो नान्यो विपाके मधुरस्तु सः। कफं करोति नो पित्तं केवलोऽनिलनाशनः॥ पलाण्डुः कटुको बल्यो गुरुर्वातास्त्रपित्तजित्। अन्यः 'क्षीरपलाण्डु'श्च वृष्यो मधुरपिच्छलः॥ धन्वन्तरीयनिघण्टुः॥ पलाण्डुः कटुको बल्यः कफपित्तहरो गुरुः। वृष्यश्च रोचनः स्निग्धो वान्तिदोषविनाशनः॥ राजनिघण्टुः॥ स्वादुः पाके रसेऽनुष्णः कफ-कृन्नातिपित्तलः। हरते केवलं वातं बलवीर्यकरो गुरुः॥ भावप्रकाशः।

वैद्यके व्यवहारः– (१) 'नासिकास्रुते रक्ते' पलाण्डुः–"यवासमूलानि पलाण्डु-मूलम्। नस्यं...। (चि. ५ अ.)। (२) 'रक्तार्शःसु' पलाण्डुः– "रसस्वड़्यूषयवागूसंयुक्तः केवलोऽथवा जयति। रक्तमतिवर्त्तमानं वातञ्च पलाण्डुरुपयुक्तः॥" (चि. ९ अ.)। 'हिक्काश्वासयोः' पलाण्डुः–"रसोनस्य पलाण्डोर्वा मूलं...। नावयेत्..."। (चि. २१ अ.)। चरकः।

विविध भाषाओं में नाम–

सं.– पलाण्डुः, यवनेष्टः, दुर्गन्धः, मुखदूषकः। हि.– पियाजा, प्याज। बं.– पेयाज। म.– कान्दा, पाठरा, कादा। कं.– मुल्ली, उली, इरुल्ली। गु.– इंगुली। म.– कोदो। ते.– नीरउली, उल्लिगड्डा। द्रा.– वेगाय। फा.– आज। अ.– वसल, अरुशील, वसन्त लकार। अं.– ओनियन। ले.– एल्लियान सियो।

गुण प्रकाशिका सं.– दुर्गन्ध, मुख दूषक।

गुण एवं दोष–

चरक के अनुसार– पलाण्डु कफकारक है, वातनाशक है किन्तु पित्त दूर नहीं करता है। यह आहार के साथ प्रयोग करने योग्य है, बलकारक है, गुरु है, बल्य तथा रोचक है। (च.सू.अ.२७)।

सुश्रुत के अनुसार– पलाण्डु (प्याज) बलकारक है, तथा थोड़ा पित्त कारक है। प्याज जाठराग्नि को बढ़ाता है, स्निग्ध है, रुचिकर है तथा रस रक्तादि धातु को स्थिर रखनेवाला है। यह बल कारक है, मेधा, कफ तथा पुष्टिप्रद है, स्वाद है, गुरु है, रक्त पित्त रोग में प्रशस्त है। यह पिच्छल है तथा इसको क्षीर पलाण्डु कहते हैं (सु सू.अ.४६)।

वाग्भट के अनुसार– पलाण्डु उसके गुण से कुछ न्यून है, कफकारक है, अधिक पित्तवर्द्धक नहीं है, कफ तथा वातार्श के रोगियों के लिए पथ्य है, स्वेद में तथा अभ्यवहृति में पथ्य है। (वाग्भट सू.अ.६)।

धन्वन्तरी निघण्टु के अनुसार– पलाण्डु उसका कोई ऊन्दागुण नहीं है। यह विपाक में मधुर है। यह कफ को बढ़ाता है, पित्त को नहीं बढ़ाता है, केवल वात नाशक है। पलाण्डु कटु रस, बल्य तथा गुरु है और वात रक्त तथा रक्त पित्त को दूर करता है। दूसरे प्रकार का पलाण्डु क्षीर पलाण्डु है। यह वीर्यवर्द्धक है, मधुर है तथा पिच्छिल है।

राजनिघण्टु के अनुसार– पलाण्डु कटु रस तथा बलकारक है और कफ-पित्त को दूर करता है, गुरु है, वीर्यवर्द्धक है, रोचन है तथा स्निग्ध है और वमन दोष का नाश करता है।

भावप्रकाश के अनुसार- पलाण्डु पाक में स्वादिष्ट, रस में अनुष्ण है, कफकारक है, अधिक पित्तकारक नहीं है। यह केवल वात विकार को दूर करता है और मल तथा वीर्यकारक है, गुरु है।

वैद्यक शास्त्र में पलाण्डु का प्रयोग-

(१) नासिका से रक्त निकलने पर पलाण्डु का प्रयोग- यवासा की जड़ तथा पलाण्डु के रस का नस्य-नासिका से निकलते रक्त को रोकता है। (च.चि.अ.५)। **(२) रक्तार्श में पलाण्डु का प्रयोग-** रस खड़, यूष तथा यवागू से युक्त पलाण्डु का उपयोग रक्तार्श में अधिक रक्त निकले पर करने से रक्तार्श तथा वात रोग को जीत लेता है। (च.चि.अ.९)। **(३) हिक्का तथा श्वास में पलाण्डु का प्रयोग-** लहसुन तथा पलाण्डु के मूल का नस्य देना हिक्का तथा श्वास रोग में हितकर है। (च.चि.अ.२१)

Constituents—Scillapicrine soluble in water and alcohol. Scillamarine soluble in alcohol and chloroform and Scillinine soluble in alcohol but insoluble in water and chloroform; a peculiar Carbo-hydrate, sinistrin, sugar, mucilage and citrate of Calcium ash, 3 p.c. (R. N. Khory—II, p. 616). **Actions and uses**—In small doses, stimulant, expectorant and diuretic, It slows heart's beat and increases the flow of urine. It is excreted by the bronchial, genito-urinary and gastro-intestinal secretions. In large doses, it is emetic and cathartic and in excessive doses a narcotic acrid poison, causing nausea, strangury or bloody urine, often suppression of urine, gastro enteritis followed by convulsion and paralysis of heart and death. As an expectorant it is given in chronic bronchitis, whooping cough, asthma, croup and catarrhal affections; generally combined with ammonia, ipecacuanha asafetida and benzoin. In croup it is generally given with tartar emetic. It should never be given in the acute stage of inflammation of the lungs. As diuretic it is given with digitalis and salines, in asthenic form of cardiac dropsy when there is no fever, in rhcumatism, calculous affections and skin diseases. In these it is generally mixed with figs; anise, grape juice and honey. Syrup of squills is of great value in acute bronchitis where the sputum is tenaceous and scanty; also in chronic bronchitis associated with emphysema and in spasmodic croup (R. N. Khory—II, p. 615).

पलाशः

पलाशः, किंशुकः। Butea frondosh.

व्यवहारज्ञापिका संज्ञा–"याज्ञिकः", "समिद्वरः"। परिचयज्ञापिका संज्ञा–"त्रिपर्णः" "वक्रपुष्पः" "रक्तपुष्पः"। गुणप्रकाशिका संज्ञा– "क्षारश्रेष्ठः" "बीजस्नेहः"। क्षारश्रेष्ठः कृमिघ्नश्च सङ्ग्राही दीपनः सरः। प्लीहगुल्मग्रहण्यर्शोवातश्लेष्मविनाशनः॥ किंशुकस्यापि 'कुसुमं' सुगन्धि मधुरञ्च यत्। 'बीजन्तु' कटुकं स्निग्धमुष्णं कृमिवलासजित्॥ धन्वन्तरीयनिघण्टुः॥ पलाशस्तु कषायोष्णः कृमिदोषविनाशनः। 'तद्बीजं' पामाकण्डुतिदद्रुत्वग्दोषनाशकृत्॥ तस्य 'पुष्पञ्च' सोष्णञ्च कण्डूकुष्ठार्त्तिनाशनम्। रक्तः पीतः सितो नीलः कुसुमैस्तु विभज्यते॥ किंशुकैर्गुण–साम्येऽपि सितो विज्ञानदः स्मृतः। राजनिघण्टुः॥ कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित्। भग्नसन्धानकृद्दोष-ग्रहण्यर्शःकृमीन् हरेत्॥ तत् 'पुष्पं' स्वादु पाके तु कटु तिक्तं कषायकम्। वातलं कफपित्तास्त्रकृच्छ्रजिद् ग्राहि शीतलम्॥ तृड्दाहशामकं वातरक्तकुष्ठहरं परम्। 'फलं' लघूष्णं मेहार्शःकृमि-

वातकफापहम्॥ विपाके कटुकं रूक्षं कुष्ठगुल्मो-दरप्रणुत्। भावप्रकाशः॥ 'पलाशमूलस्वरसो' नेत्रच्छायान्ध्यपुष्पजित्। 'तद्बीजं' कृमिविध्वंसि 'काण्डो' रसायने हितः॥ शोढलनिघण्टुः॥ 'पलाशभवनिर्यासो' ग्राही च क्षपयेद्ध्रुवम्। ग्रहणीं मुखजान् कासाञ्जयेत् स्वेदातिनिर्गमम्॥ आत्रेयसंहिता।

वैद्यके व्यवहारः– (१) 'रक्तपित्ते'–पलाशत्वक्–"पलाशवृक्षस्य रसेन सिद्धं तथैव कल्केन मधुद्रवेन। लिह्याद्घृतं...।" (चि. ४ अ.)। (२) 'अर्शःसु' पलाशपत्रम्–"त्रिवृद्दन्तीपलाशानां...। सुभृष्टं यमके दद्याच्छाकं दधिसरायुतम्॥" (चि. ९ अ.)। (३) 'अतिसारे' पलाशफलम्– "पलाशफलनिर्यूहं पयसा पाययेत तम्। ततोऽनुपाययेत् कोष्णं क्षीरमेव यथाबलम्॥ प्रवाहिते मले तेन प्रशाम्यत्युदरामयः।" (चि. १० अ.)। चरकः॥ 'क्रिमिषु' पलाशबीजम्–"पलाशबीजस्वरसं कल्कं वा तण्डुलाम्बुना।" (उ. ५४ अ.)। सुश्रुतः॥ 'रक्तपित्ते' पलाशवल्कलम्– "पलाशवल्कलक्वाथो सुशीतः शर्करान्वितः॥ पिबेद्वा मधुसर्पिभ्यां...॥" (चि. २ अ.)। वाग्भटः॥ 'अर्शसुः' पलाशक्षारः–"व्योषगर्भं" पलाशस्य त्रिगुणे भस्मवारिणि। साधितं पिबतः सर्पिः पतन्त्यर्शांस्य-संशयम्॥" (अर्शः चि.)। चक्रदत्तः॥ (१) 'रक्तगुल्मे' पलाशक्षारः–"पलाश-क्षारतोयेन सर्पिःसिद्धं पिबेच्च सा।" (गुल्मचिः)। (२) 'पुष्पाख्ये नेत्ररोगे' पलाशपुष्पम्–"पलाशपुष्पस्वरसैर्बहुशः परिभावितम्। करञ्जबीजं तद्वर्त्तिर्दृष्टेः पुष्पं विनाशयेत्॥" (म. ख. ४ भा.)। (३) 'वीर्यवत्तनयलाभार्थं' पलाशपत्रम्–"पत्रमेकं पलाशस्य पिष्ट्वा दुग्धेन गर्भिणी। पीत्वां पुत्रमवाप्नोति वीर्यवन्तं न संशयः॥" (म. ख. ४ भा.)। भावप्रकाशः॥ (१) 'पित्ताभिष्यन्दे' पलाशशोणितम्–"पालाशं स्याच्छोणितं चाञ्जनार्थं...।" (नेत्ररोगाधि.)। (२) 'योनिगाढीकरणार्थं' पलाशफलम्–"पलाशोदुम्बरफलं तिलतैलसमन्वितम्। मधुना योनि-मालिप्य गाढीकरणमुत्तमम्॥" (स्त्रीरोगाधि.)। (३) 'वृश्चिकदंशने' पलाशबीजम्–"अर्कक्षीरेण सम्पिष्टं लेपाद्बीजं पलाशजम्। वृश्चिकार्त्तिं हरेत्...॥" (विषाधिका.)। वङ्गसेनः।

विविध भाषाओं में नाम-

सं.- पलाश, किंशुक, क्षार-श्रेष्ठ, ब्रह्म वृक्ष, सामवेद। हि.- ढाक, पलास, परास, टेसू., फेसू., धारा, काकरिया। बं.- पलाश गाछ। म.- पलाश। गु.- खारवरो। क.- मुत्तलु, मृदुगदगिड़! ते.- मातका चेट्टु। ता.- परशन। मा.- छिवरो। द्रा.- देवाश। फा.- फल ध। अं.- हीपोरेस्ट फेन। ले.- व्युटिका फविफ्लोरा।

व्यवहार ज्ञापिका सं.- याज्ञिका, समिद्धरः। **परिचय ज्ञापिका सं.**- त्रिपर्णः, वक्रपुष्पः, रक्त-पुष्पः। **गुण प्रकाशिका सं.**- क्षारश्रेष्ठः, बीजस्नेहः।

गुण एवं दोष-

धन्वन्तरीय निघण्टु के अनुसार- क्षार श्रेष्ठ (पलाश), क्रिमिनाशक, ग्राही, जाठराग्नि दीपक तथा सारक है और प्लीहा रोग, गुल्मरोग, ग्रहणी, अर्शरोग, वातरोग तथा कफ रोग का नाश करता है। पलास का फूल सुगन्धित तथा मधुर है। पलास का बीज कटु रस स्निग्ध तथा उष्ण है और क्रिमि रोग तथा कफ रोग को जीत लेता है।

राजनिघण्टु के अनुसार- पलास कषाय रस तथा उष्ण है और क्रिमि विकार का नाश करता है। पलास का बीज पामा, कण्डू, दाद तथा त्वचा दोष का नाश करता है। पलास का पुष्प उष्ण है तथा कण्डू, कुष्ठ तथा पीड़ा का नाश करता है। पलास विभाग रक्त पुष्प, पीत पुष्प, सितपुष्प तथा नील पुष्प के आधार पर किया जाता है। पुष्पों के गुण की साम्यता होने पर भी सफेद पुष्प वाला पलाश विज्ञान प्रद है।

भावप्रकाश के अनुसार- पलास कषाय रस, कटु रस तथा तिक्त रस है, उष्ण है और गुदजरोग (अर्श रोग) को दूर करता है। यह भग्न संधान कारक है, त्रिदोष, ग्रहणी, अर्शरोग तथा क्रिमिरोग को नष्ट करता है। पलास का पुष्प पाक में स्वादिष्ट, कटु रस तथा तिक्तरस है एवं कषाय रस है। यह वातकारक है तथा कफविकार, पित्त विकार, रक्त विकार और मूत्र कृच्छ्र को दूर करता है, ग्राही है तथा शीतल है। यह प्यास तथा दाह शामक है और वातरक्त एवं कुष्ठरोग को दूर करता है। पलास का फल लघु तथा उष्ण है और यह प्रमेह, अर्श, क्रिमिरोग, वातरोग तथा कफ रोग को दूर करता है। यह विपाक में कटु है, रूक्ष है तथा कुष्ठ रोग, गुल्म रोग एवं उदर रोग को दूर करता है।

सोढ़ल निघण्टु के अनुसार- पलास मूल का स्वरस नेत्रछाया, नेत्रान्ध्य तथा नेत्र पुष्प (मोतियाबिन्द) को जीत लेता है। पलास का बीज क्रिमिनाशक है। पलास का काण्ड रसायन में हितकर है।

आत्रेय संहिता के अनुसार- पलास का निर्यास (गोंद) ग्राही है तथा ग्रहणी, मुख रोग, [illegible]स रोग का नाश करता है तथा स्वेद निकलने को रोकता है।

वैद्यक शास्त्र में पलास का प्रयोग-

(१) रक्त पित्त में पलास छाल का प्रयोग- पलास छाल के रस से सिद्ध घृत शहद मिलाकर रक्त पित्त में चाटे। (च.चि.अ.४) **(२) अर्श रोग में पलास पत्र का प्रयोग**- निशोथ, दन्ती तथा पलास के पत्तों का शाक घी तथा तैल में भूनकर तथा दही का पानी मिलाकर अर्श रोग में प्रयोग करे। (च.चि.अ. ९)। **(३) अतिसार में पलास फल का प्रयोग**- पलास के फल का यूष अतिसार के रोगी को दूध के साथ पान कराये। उसके बाद गरम जल पान कराये तथा बल के अनुसार दूध का ही प्रयोग करे। इससे मल के निकल जाने पर उदर रोग शान्त हो जाता है। (च.चि.अ.१०)।

क्रिमिरोग में पलास बीज का प्रयोग- क्रिमिरोग में पलास बीज का स्वरस का कल्क चावल के धोअन के साथ पान कराये। (सु.शि.५४)।

रक्त पित्त में पलास छाल का प्रयोग- पलास के छाल का क्वाथ शीतल कर तथा शक्कर मिलाकर या मधु एवं घृत के साथ रक्त पित्त में पान करे। (वाग्भट चि.अ.२)।

अर्श रोग में पलास क्षार का प्रयोग- पलास के पत्ते के बीच में व्योष (सोठ, पीपर, मरिच) को जलाकर उसके भस्म को तीन बार जल से धोकर उसमें साधित घृत सेवन करने से अर्श रोग का नाश होता है, इसमें सन्देह नहीं है। (चक्र.अर्शरोग चि.)।

(१) रक्त गुल्म में पलास क्षार का प्रयोग- पलास क्षार के जल के साथ सिद्ध घृत रक्त गुल्म में पान कराये। (भाव प्र. गुल्म चि.)। **(२) पुष्पाख्य नेत्र रोग (मोतिया बिन्द) में पलास पुष्प का प्रयोग**- पलास के पुष्प के स्वरस के साथ अनकर करञ्ज बीज को भावित कर तथा उसकी वाति बनाकर नेत्र में लगाये। यह नेत्र के पुष्प रोग (मोतिया विन्द) को नष्ट करती है। (भावप्रकाश म.ख.४)। **(३) बलवान पुत्र की प्राप्ति**

के लिए पलास पत्र का प्रयोग- पलास के एक पत्र को पीसकर उसका दूध के साथ पान कर गर्भिणी बलवान पुत्र को प्राप्त करती है, इसमें सन्देह नहीं है। (भाव.म.ख. ४)

(१) **पित्ताभिष्यन्द रोग में पलास शोणित का प्रयोग**- नेत्र रोग में पलास रस का अञ्जनार्थ प्रयोग करे। (बंगसेन नेत्ररोगाधिकार)। (२) **योनिगाढीकरणार्थ पलास फल का प्रयोग**- पलास तथा उदुम्बर (गूलर) के फल को तिल तैल में पकाकर उस तैल का मधु मिलाकर योनि में लेप करने से स्त्रियों की योनि अच्छी तरह कड़ी बन जाती है। (बंगसेन, स्त्रीरोगाधिकार)। (३) **वृश्चिचक दंश में पलाश बीज का प्रयोग**- पलास के बीज को मदार के दूध के साथ पीसकर लेप करने से वृश्चिक (बिच्छू) दंश के विष को दूर करता है (बंगसेन, विषाधिकार)।

Constituents—The gum contains kino, tannic and gallic acids 50 p.c. mucilage and ash 2 p.c.; on dry distillation it yields pyrocate chin. The seeds contain a tasteless oil of a yellow colour; wax or fat 18 p.c. albuminoid, gum, glucose, organic acids, metarabic acid and phlobaphene, cellulose, ash 5 p.c., (*Materia Medica of India II, p.* 165).

Actions and uses—Leaves astringent and alterative used in diarrhoea, pyrosis, sweating of phthisis, diabetes, menorrhagia, worms and colic. A hot poultice of leaves is used to disperse boils and pimples. The decoction is used as an injection into the rectum in diarrhoea dysentery, and into the vagina in leucorrhoea; also used as a gargle in sore throat and ulcers of the mouth. The seeds are aperient and anthelmintic, used with success in tape-worms and round-worms. A decoction of seeds and infusion of flowers is used with nitre as a diuretic in dysuria and in retention of urine. Externally the seeds are irritant and used with lime juice in dhobie's itch, ringworm, indolent ulcers and fistula. Gum.—A powerful astringent and a good substitute for kino and may be used for all the purposes for which kino is used. The natives use this gum, combined with rock salt and other astringents in pterygium and opacities of the Cornea. Flowers are also astringent and diuretic. Varalians of flowers are applied to the pubes in dysuria and retention of urine and to promote menses. (*Do, II, p. 195*).

पाठा

पाठा, अम्बष्ठा। Clypea hernendifolia, Cissampelos, hexendra, C. pareira.

पूर्वाचार्यकृतवर्णनम्–"पाठा अविद्धकर्णी पाढ़ इति लोके" (डल्हणः ३८ सू. आरग्वधादिग. टी.)। परिचयज्ञापिका संज्ञा– "त्रिशिरा", "अविद्धकर्णी" (अविद्धोऽच्छिद्रः पर्णरूपः कर्णोऽस्याः), "वृत्तपर्णी"। गुणप्रकाशिका संज्ञा– "तिक्तपुष्पा", "वरतिक्ता", "दीपनी"। पाठा तिक्तरसा वृष्या विषघ्नी कुष्ठकण्डूनुत्। छर्दिहृद्रोगज्वरजित्त्रिदोषशमनी परा॥ पाठाऽतिसारशूलघ्नी कफपित्तज्वरापहा। धन्वन्तरीयनिघण्टुः॥ पाठा तिक्ता गुरूष्णा च वातपित्तज्वरापहा। भग्नसन्धानकृत् पित्तदाहाति-सारशूलहृत्॥ राजनिघण्टुः॥ पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः। हन्ति शूलज्वरच्छर्दि-कुष्ठातिसारहृद्रुजः॥ दाहकण्डूविषश्वासकृमिगुल्मगरव्रणान्। भावप्रकाशः॥ पाठाऽतिसारशमनी लघ्वी दोषत्रयापहा। राजवल्लभः॥

वैद्यके व्यवहारः–'अर्शःसु' पाठा–"दुष्पर्शकेन बिल्वेन यमान्या नागरेण वा। एकैकेनापि

संयुक्ता पाठा हन्त्यर्शसां रुजम्॥" (चि. ९ अ.)। चरकः॥ (१) 'लवणमेहे' पाठा– "पाठाऽगरुकषायं लवणमेहिनं..."। (चि. ११ अ.)। (२) 'ग्रन्थीभूते शुक्रे' पाठा– "ग्रन्थीभूते पिबेत् पाठाम्।" (शा. २ अ.)। सुश्रुतः॥ अर्शःकर्त्तु'र्वायोरनुलोम्याय' पाठा– "पाठया वा युतं तक्रं वातवर्चोऽनुलोमनम्।" (चि. ८ अ.)। वाग्भटः॥ (१) 'अन्तर्विद्रधौ' पाठा– "शमयति पाठामूलं क्षौद्रयुक्तं तण्डुलाम्बुना पीतम्। अन्तर्भूतविद्रधिमुद्धतमाश्वेव मनुजस्य च।" (विद्रधिचि.)–(२) 'सुखप्रसवार्थं' पाठामूलम्– पाठायास्तु शिफां योनौ या नारी सम्प्रधारयेत्। शिरःप्रसवकाले तु सा सुखेन प्रसूयते।" (स्त्रीरोगचि.)। चक्रदत्तः॥ 'अतिसारे' पाठामूलम्– "पाठां पिष्ट्वा च गोदध्ना...। अतिसारं व्यथादाहं हन्त्येवाशु न संशयः।" (म. ख. १मः भा.)। भावप्रकाशः॥ 'अतिसारे' पाठापत्रम्– "माहिषेन तु तक्रेण पाठापत्रं तथैव" (अतिसाराधि.)। वङ्गसेनः॥

विविध भाषाओं में नाम–

सं.– पाठा, अम्बष्ठा, प्राभीना, पापचेलिका। हि.– पाठा, (पाठ, रठी), पाढ, पाढी, पुरइन पाढ़ी, पुरइन पाती। बं.– आकनादि, निमक, चक्रपाठा। म.– पहाड़, पहाड़मूल। गु.– पाड, कालीपाठ, करेंटीमूल, करेंढ़ियु। क.– पांठा, अगुरु सुटि। ता.– पाड़ा। उ.– अकान्विन्धि। तु.– तिम्पले। ते.– चिर वछी। अं.– परेरा रूट।

पाठा का पूर्वाचार्यकृत वर्णन– पाठा अविद्धकर्णी पाढ़ इति लोक (डल्वण सु.टी.सू.अ. ३८ आरग्वधादिगण)। **परिचयज्ञापिका सं.–** त्रिशिरा, अविद्धकर्णी। अविद्ध अछिद्र, पर्णरूप कर्म है इसका इति अविद्धपर्णी, वृत्त पर्णी। **गुणप्रकाशिका सं.–** तिल पुष्पा, वरतिक्ता, दीपनी।

गुण एवं दोष–

धन्वन्तरीय निघण्टु के अनुसार– पाठा तिक्तरस, वीर्यवर्द्धक तथा विष नाशक है और कुष्ठरोग एवं कण्डू को दूर करती है। यह वमन, हृदय रोग तथा ज्वर को जीत लेती है और त्रिदोष को अच्छी तरह शान्त करती है। पाठा अतिसार तथा शूल का नाश करती है और कफ विकार, पित्त विकार एवं ज्वर को दूर करती है।

राजनिघण्टु के अनुसार– पाठा तिक्तरस, गुरु तथा उष्ण है और वात, पित्त एवं ज्वर को दूर करती है, भग्न संधान कारक है और पित्त विकार, दाह, अतिसार तथा शूल का दूर करती है।

भावप्रकाश के अनुसार– पाठा उष्ण, कटुरस तथा तीक्ष्ण है और वातरोग तथा कफ रोग को दूर करती है एवं लघु है। यह शूल, ज्वर, वमन, कुष्ठरोग तथा अतिसार की पीड़ा को दूर करती है।

राजवल्लभ के अनुसार– पाठा अतिसारशामक है, हल्की है तथा तीनों दोषों का नाश करती है।

वैद्यक शास्त्र में पाठा का प्रयोग–

अर्शरोग में पाठा का प्रयोग– यवासा, बिल्व यवायन या नागर (सोंठ) इनमें किसी एक के साथ पाठा का प्रयोग अर्श की पीडा का नाश करती है। (च.चि.९)।

(१) लवण मेह में पाठा का प्रयोग– पाठा तथा अगर का कषाय लवण मेही को पिलाये। (सं.चि.अ. ११)। **(२) शुक्ल के गाँठ पड़ जाने पर पाठा का प्रयोग–** शुक्ल के गाँठ पड़ जाने पर पाठा का क्वाथ पान करे। (सु.शि.अ.२)।

अर्शकारक वायु के अनुलोमन के लिए पाठा का प्रयोग– पाठा के साथ तक्र (मट्ठा) को मिलाकर वात एवं मल के अनुलोमन के लिए पान कराये। (वाग्भट.चि.अ.८)।

(१) **अन्तर्विद्रधि में पाठा का प्रयोग**- पाठा के मूल का चूर्ण मधु मिलाकर चावल के धोअन के साथ पान करने से मनुष्य की भयंकर अन्तर्विद्रधि शान्त हो जाती है। (चक्र.विद्रधि चि.)। (२) **सुखपूर्वक प्रसव के लिए पाठा मूल का प्रयोग**- जो स्त्री पाठा (पाढ़) के मूल का योनि में धारण करती है वह प्रसव काल में सुखपूर्वक प्रसव करती है। (चक्र.स्त्री रोग चि.)।

अतिसार में पाठामूल का प्रयोग- पाठा को पीसकर दही के साथ पान करने से अतिसार व्यथा तथा दाह शीघ्र ही नष्ट हो जाते हैं, इसमें संदेह नहीं है। (भाव.म.ख.१)।

अतिसार में पत्र का प्रयोग- पाठा के पत्र के चूर्ण का या कषाय का भैंस के मट्ठा के साथ सेवन करने से अतिसार रोग शान्त होता है। (वंगसेन अतिसाराधिकार)।

पारिभद्रः

पारिभद्रः, पारिजातः, पालिधा। Erythrima Indica, Lam.

परिचयज्ञापिका संज्ञा—"कण्टकी", "कण्टकिंशुकः", "रक्तकुसुमः", "रक्तकेसरः", "बहुपुष्पः"। गुणप्रकाशिका संज्ञा—कृमिघ्नः। पारिभद्रः कटूष्णः स्यात् कफवातनिकृन्तनः। अरोचकहरः पथ्यो दीपनश्चापि कीर्त्तितः॥ राजनिघण्टुः॥ पारिभद्रोऽनिलश्लेष्मशोथमेदः-क्रिमिप्रणुत्। तत्'पत्रं' पित्तरोगघ्नं कर्णव्याधिविनाशनम्॥ भावप्रकाशः॥ पारिभद्रोऽनिलश्लेष्मशोथमेहकृमीञ्जयेत्। राजवल्लभः॥

वैद्यके व्यवहारः—(१) 'उदकमेहे' पारिभद्रः—"उदकमेहिनं पारिजात-कषायं पाययेत्" (चि. ११ अ.)। (२) 'पुतना' प्रतिषेधे पारिभद्रः— "...पारिभद्रकः बालानां परिषेचने" (उ. ३२ अ.)। (३) 'कृमिषु' पारिभद्रपत्रम्—"पारिभद्रकपत्राणां क्षौद्रेण स्वरसं पिबेत्" (उ. ५४ अ.)। सुश्रुतः॥ अधोगे 'अम्लपित्ते' पारिभद्रः—"पारिभद्रदलानीति चामलक्याः फलानि च। क्वाथपानं प्रयोक्तव्यमम्लपित्तं व्यपोहति॥" (चि. २५ अ.)। हारीतः॥ (१) अवबाहुके पारिभद्रः—"अथ पारिभद्रात्...। स्वरसं पिबेद्वा "(वातव्याधिचि.)। (२) 'कफोद्भूताक्षिशूले' पारिभद्रः—"वल्कलं पारिजातस्य तैलं काञ्जिकसैन्धवम्। कफोद्भूताक्षिशूलघ्नं तरुघ्नं कुलिशं यथा॥" (नेत्रचि.)। चक्रदत्तः॥

विविध भाषाओं में नाम-

सं.- पारिभद्र, मन्दार, पारिजात। हि.- फरहन्द, जलनीम। बं.- पलित मन्दार। म.- पांगरा। गु.- पाण्डरेव, पनएवेशु। क.- हरिवाल। म.- मसकृमरम्। ते.- मुलमोति चेट्टु। द्रा.- पजीर, कल्याणमुरङ्गे। ता.- मुराक। भा.- फरहद। ले.- एरिथ्रिमा इन्डिका।

परिचय ज्ञापिका सं.- कण्टकी, कण्टकिंशुकः, रक्तकुसुम, रक्तकेशर, बहुपुष्प। **गुणप्रकाशिका सं.**- क्रिमिघ्नः।

गुण एवं दोष-

राजनिघण्टु के अनुसार- पारिभद्र (फरहद) कटु रस तथा उष्ण है और कफ विकार तथा वात विकार का नाश करता है। यह अरोचक को दूर करता है, पथ्य है तथा जाठराग्नि दीपक है।

भावप्रकाश के अनुसार- पारिभद्र वात तथा कफ विकार, शोथ, मेदो विकार एवं क्रिमिरोग को दूर करता है। फरहद का पत्ता पित्तरोग का नाश करता है तथा कर्ण व्याधि को दूर करता है।

राजवल्लभ के अनुसार- वात तथा कफ विकार, शोथ, प्रमेह एवं क्रिमिरोग को दूर करता है।

वैद्यक शास्त्र में पारिभद्र का प्रयोग-

(१) उदकमेह में पारिभद्र का प्रयोग- उदकमेह के रोगी को फरहद का क्वाथ पान कराये। (सू.चि. अ.११)। **(२) पूतना प्रतिषेध के लिए पारिभद्र का प्रयोग-** बालकों के पूतनाग्रह होने पर फरहद के क्वाथ से सेचन (स्नान) कराये। (सु.उ.अ.३२)। **(३) क्रिमिरोग में पारिभद्र पत्र का प्रयोग-** क्रिमिरोग में फरहद के पत्ते का रस मधु के साथ पान कराये। (ए.उ.अ.५४)।

अधोमार्ग से निकलते अम्ल पित्त में पारिभद्र का प्रयोग- फरहद का पत्ता तथा आँवला का फल इन दोनों का क्वाथ पान कराये। यह अम्ल पित्त को शान्त करता है। (हारीतसं. अ.२५)।

(१) अवबाहुक रोग में पारिभद्र का प्रयोग- अवबाहुक रोग में पारिभद्र का स्वरस पान करे। (चक्र. वात.चि.)। **(२) कफजन्य नेत्र शूल में पारिभद्र का प्रयोग-** फरहद के छाल का तैल, काञ्जी तथा सेन्धा नमक इन सब को मिलाकर प्रयोग करने से कफजन्य नेत्र शूल का नाश होता है, जैसे वज्र से पेड़ का नाश होता है। (चक्र.नेत्र.चि.)।

Constituents— The bark contains two resins and a bitter alkaloid erytherine. (*R. N. Khory II. p.* 212). **Actions and Uses—**The leaves are alterative, laxative, diuretic, galactagogue and emmenagogue used in syphilis, fevers, amenorrhoea &c. With cocoanut milk they are used as galactagogue. The bark is astringent and tonic and given in dysentry fevers &c. The leaves made hot (varalians) are applied to disperse buboes. Erytherine has actions antagonistic to those of strychnine, and may be used as an antidote. (Do II. p. 212).

पिप्पली

पिप्पली, मागधी, कृष्णा, उपकुल्या, कणा, वैदेही। Piper longum. Chavica Roxburghii. **गजपिप्पली।**

पिप्पली कटुका स्वादुर्हिमा स्निग्धा त्रिदोषजित्। तृड्ज्वरोदर-जन्त्वामनाशनी च रसायनी॥ 'मूल'गुणाः—कटूष्णं पिप्पलीमूलं श्लेष्मसङ्घातनाशनम्। वातोच्छित्तिकरं हन्ति कृमीन् वह्निप्रदीप्तिकृत्॥ धन्वन्तरीयनिघण्टुः॥ पिप्पली ज्वरहा वृष्या स्निग्धोष्णा कटुतिक्तका। दीपनी मारुतश्वासकास-श्लेष्मक्षयापहा॥ 'मूल'गुणाः—कटूष्णं पिप्पलीमूलं श्लेष्मकृमिविनाशनम्। दीपनं वातरोगघ्नं रोचनं पित्तकोपनम्॥ राजनिघण्टुः॥ पिप्पली दीपनी वृष्या स्वादुपाका रसायनी। अनुष्णा कटुका स्निग्धा वातश्लेष्महरी लघुः॥ पिप्पली रेचनी हन्ति श्वासकासोदरज्वरान्। कुष्ठप्रमेहगुल्मार्शःप्लीहशूलाम-मारुतान्॥ 'आर्द्रा' कफप्रदा स्निग्धा शीतला मधुरा गुरुः। पित्तप्रशमनी सा तु शुष्का पित्तप्रकोपिनी॥ पिप्पली मधुसंयुक्ता मेदःकफविनाशिनी। श्वासकासज्वरहरा वृष्या मेध्याग्निवर्द्धिनी॥ जीर्णज्वरेऽग्निमान्द्ये च शस्यते गुडपिप्पली। कासाऽजीर्णारुचिश्वासहृत् पाण्डुकृमिरोगनुत्॥ द्विगुणः पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः। 'मूल'-गुणाः—दीपनं पिप्पलीमूलं कटूष्णं पाचनं लघु। रूक्षं पित्तकरं भेदि कफवातोदरापहम्॥ आनाहप्लीहगुल्मघ्नं कृमिश्वासक्षयापहम्। भावप्रकाशः॥ भेदनं पिप्पली'मूलं' दीपनं कफनाशनम्। राजवल्लभः॥

वैद्यके व्यवहार:–कासे पिप्पली–"अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम्" (चि. २२)। चरकः॥ (१) वातशोणिते पिप्पली– "...पिप्पलीर्वा क्षीरपिष्टा वारिपिष्टा वा पञ्चाभिवृद्ध्या दशाभिवृद्ध्या वा पिबेत् क्षीरौदनाहारो दशरात्रं भूयश्चापकर्षयेदेवं यावत् पञ्चदशचेति। तदेतत् पिप्पलीवर्द्धमानकं वातशोणितविषमज्वरारोचक-पाण्डुरोगप्लीहोदरार्शः-कासश्वासशोफशोषाग्नि-सादहृद्रोगोदराण्युपहन्ति।" (चि. ५ अ.)। (२) अर्शःसु पिप्पली पिप्पली-मूलञ्च–"पिप्पली पिप्पलीमूल... पूर्ववदेव, निरन्नो वा तक्रमहरहर्मासमुपसेवेत" (चि. ६ अ.)। (३) क्रिमिषु पिप्पलीमूलम्–"पिबेद्वा पिप्पलीमूलमजामूत्रेण संयुतम्" (उ. ५४ अ.)। (१) कफजकासे पिप्पली–"तैलभृष्टञ्च वैदेहीकल्काक्षं ससितोपलम् पाययेत् कफकासघ्नं कुलत्थसलिलाप्लुतम्॥" (चि. ३ अ.)। (२) प्रवाहिकायां पिप्पली–"पिप्पल्याः पिबतः सूक्ष्मं रजो मरिचजन्म वा। चिरकालानुषक्ताऽपि नश्यत्याशु प्रवाहिका॥" (चि. ९ अ.)। वाग्भटः॥ (१) श्लेष्मज्वरे पिप्पली–"क्षौद्रेण पिप्पलीचूर्णं लिह्यात् श्लेष्मज्वरापहम्। प्लीहानाहविबन्धार्त्तिकासश्वासविमर्द्दनम्॥" (चि. ३ अ.)। (२) कासादौ पिप्पली– "कासाजीर्णे श्वासहृत्पाण्डुरोगे मन्देवाग्नौ कामलाऽरोचके च। तेषां शस्तं पिप्पली स्याद्गुडेन हन्यान्नॄणां जीर्णमाशु ज्वरञ्च॥" (चि. २ अ.)। (३) स्तन्यवर्द्धनार्थं पिप्पलीमूलम्–"मरिचं पिप्पलीमूलं क्षीरं क्षीरविवृद्धये" (चि. ५२ अ.)। हारीतः॥ (१) वातश्लेष्मज्वरे पिप्पली–"पिप्पलीभिः शृतं तोय-मनभिष्यन्दि दीपनम्। वातश्लेष्मविकारघ्नं प्लीहज्वरविनाशनम्॥" (ज्वर-चि.)। (२) रक्तपित्ते पिप्पली–"वासकस्वरसे... सप्तधा परिभाविता। कृष्णा वा मधुना लीढा रक्तपित्तं द्रुतं जयेत्॥" (रक्तपित्त-चि.)। (३) ऊरुस्तम्भे पिप्पली–"...पिप्पलीमथ नागरम्। ऊरुस्तम्भे पिबेन्मूत्रैर्दशमूलीरसेन वा॥" (ऊरुस्तम्भ-चि.)। (४) शोथे पिप्पली–"...सेवेत पिप्पली वा पयोऽन्विता (शोथचि.)। (५) अम्लपित्ते पिप्पली–"पिप्पली मधुसंयुक्ता चाम्लपित्तविनाशिनी" (अम्लपित्त-चि.) चक्रदत्तः॥ (१) प्लीह्नि पिप्पली–"तथा दुग्धेन पातव्याः पिप्पल्यः प्लीहशान्तये" (म. ख. ३ भा.)। (२) गृध्रस्यां पिप्पली–"गोमूत्रैरण्डतैलाभ्यां कृष्णाचूर्णं पिबेन्नरः। दीर्घकालोत्थितां हन्ति गृध्रसीं कफवात-जाम्॥" भावप्रकाशः॥ (१) निद्रानाशे पिप्पलीमूलम्–"गुडं पिप्पलीमूलस्य चूर्णेनालोडितं लिहन्। चिरादपि च सन्नष्टां निद्रामाप्नोति मानवः॥" (ज्वराधिका.)। (२) परिणामशूले पिप्पली–"क्वाथेन कल्केन च पिप्पलीनां सिद्धं घृतं माक्षिकसम्प्रयुक्तम्। क्षीरानुपानं विनिहन्त्यवश्यं शूलं प्रवृद्धं परिणामसंज्ञम्॥" (परिणामशूलाधि.)। हारीतः॥

विविध भाषाओं में नाम-

सं.- पिप्पली, मागधी, कृष्णा, शोण्डि, चपला, कणा, कोला। हि.- पीपर, पीपल। बं.- पिपुल। म.- पिपली। गु.- लिण्डी पीपल। क.- पिप्पली। ता.- पिंपिल। फा.- पिलपिल दराज। अ.- दारकिल किल। अं.- लांग पीपर। ले.- पाइपर लाङ्गम्।

गुण एवं दोष-

धन्वन्तरीय निघण्टु के अनुसार- पीपर कटु रस, स्वादिष्ट, शीतल तथा स्निग्ध है और त्रिदोषनाशक है। यह प्यास, ज्वर, उदर विकार तथा क्रिमि रोग का नाश करती है तथा रसायन है। पिपरामूल कटुरस तथा उष्ण है और कफ समूह का नाश करता है। यह वात रोग का नाश करता है, क्रिमिरोग का नाश करता है तथा जाठराग्नि दीपक है।

राजनिघण्टु के अनुसार- पीपर ज्वरनाशक है, वीर्यवर्द्धक है, स्निग्ध है, उष्ण है तथा कटु रस एवं तिक्तरस है। यह जाठराग्नि दीपक है, वातरोग नाशक है, श्वास, कास, कफ विकार तथा क्षय रोग को दूर करती है। पिपरा मूल कटुरस तथा उष्ण है और कफ विकार एवं क्रिमि रोग को नष्ट करता है। यह जाठराग्नि दीपक है, वात रोग-नाशक है, रोचक है एवं पित्त प्रकोपक है।

भावप्रकाश के अनुसार- पीपर जाठराग्नि दीपक, वीर्यवर्द्धक पाक में स्वादिष्ट तथा रसायन है। यह नेत्र के लिए हितकर है, कटुरस है, स्निग्ध है तथा वातकफनाशक है एवं लघु है। पीपर रेचन है और श्वास, कास, उदररोग ज्वर, कुष्ठरोग, प्रमेह, गुल्मरोग, अर्शरोग, प्लीहा रोग, शूल तथा आमवात का नाश करती है। आर्द्र पिप्पली कफप्रद है, स्निग्ध है, शीतल है, मधुर है, गुरु है तथा पित्तशामक है, वही शुष्क पिप्पली पितप्रकोपक है। पिप्पली मधु के साथ प्रयोग करने पर मेदो विकार तथा कफ का नाश करती है, श्वास, कास तथा ज्वर को दूर करती है, वीर्यवर्द्धक है तथा मेध्य है और जाठराग्नि को बढ़ाती है। जीर्ण ज्वर, मन्दाग्नि में पिप्पली गुड़ के साथ सेवन करना प्रशस्त है। यह कास, अजीर्ण, अरुचि तथा श्वास को दूर करती है तथा पाण्डुरोग एवं क्रिमिरोग का नाश करती है। चिकित्सकगण पिप्पली चूर्ण का दुगुना गुड़ लेने को कहे हैं। पिपरामूल जाठराग्नि दीपक है, कटुरस है, उष्ण है, पाचन है, लघु है, रूक्ष है, पित्तकारक है, मलभेदक है तथा कफ विकार, वात विकार एवं उदर रोग को दूर करता है। यह आनाह, प्लीहा रोग तथा गुल्म रोग का नाश करता है और क्रिमिरोग, श्वास रोग तथा क्षय रोग को दूर करता है।

राजवल्लभ के अनुसार- पिपरामूल मलभेदक है, जाठराग्नि दीपक है तथा कफनाशक है।

वैद्यक शास्त्र में पिप्पली का प्रयोग-

कास रोग में पीपर का प्रयोग- कास रोग में पिप्पली के कल्क को घृत में भूनकर तथा सैन्धा नमक मिलाकर सेवन कराये। (च.चि.अ.२२)।

(१) वातरक्त में पिप्पली का प्रयोग- पीपर के दूध के साथ पीसकर या जल के साथ घीसकर पांच-पांच पीपर बढ़ाते हुए तथा दश-दश पीपर बढ़ाते हुए पान करे। भोजन में दूध तथा भात खाय दश दिन तक पुनः उसी क्रम से कम करते हुए सेवन करे पन्द्रह दिन तक। यह पिप्पली वर्द्धमानक योग वातरक्त, विषमज्वर, अरोचक, पाण्डु रोग, प्लीहा रोग, उदररोग, अर्शरोग, कास, श्वास, शोथ, सूखा रोग, मन्दाग्नि, हृदयरोग तथा उदर रोग को नष्ट करती है। (सु.चि.अ.५)। (२) **अर्श रोग में पिप्पली तथा पिप्पली मूल का प्रयोग**- पूर्व प्रकार पिप्पली वर्द्धमान योग की तरह, पीपर तथा पिपरामूल का प्रयोग अन्न को न खाते हुए करे या एक मास तक प्रतिदिन तक्र (मट्ठा) सेवन करे। (सु.चि.अ.६)। (३) **क्रिमिरोग में पिपरामूल का प्रयोग**- पिपरामूल के चूर्ण का बकरी के मूत्र के साथ पान करे। (सु.उ.अ.५४)।

(१) कफजकास में पिप्पली का प्रयोग- वैदेही (पीपर) का तैल में भूना हुआ कल्क एक अक्ष (१० ग्राम) लेकर तथा मिश्री मिलाकर कुरथी के जल में मिलाकर पान करे। यह कफज कास का नाश करता है। (वाग्भट चि.अ.३) (२) **प्रवाहिका में पिप्पली का प्रयोग**- पीपर का महीन चूर्ण या मरिच का चूर्ण पान करने से चिरकाल से उत्पन्न प्रवाहिका का नाश होता है। (वाग्भट चि.अ.९)।

(१) कफज्वर में पीपर का प्रयोग- पीपर का चूर्ण मधु के साथ चाटे। यह श्लेष्म ज्वर को दूर करता है। यह प्लीहा, अनाह, विबन्ध, पीड़ा, कास तथा श्वास रोग का नाश करता है। (हा.चि.अ.३)। (२) **कास आदि में पिप्पली का प्रयोग**- यह कास, अजीर्ण तथा श्वास रोग को दूर करता है। पाण्डूरोग में, मन्दाग्नि में, कामला

रोग तथा अरोचक इन सब में पीपर तथा गुड़ का प्रयोग प्रशस्त है तथा मनुष्यों के जीर्ण ज्वर का यह पिप्पली गुड़ योग शीघ्र ही पुराने ज्वर का नाश करता है। (हा.चि.अ.२)। (३) **दूध बढ़ाने के लिए पिपरा मूल का प्रयोग**- मरिच चूर्ण तथा पिपरा मूल का चूर्ण तथा दूध दूध बढ़ाने के लिए पान करे। (हा.चि.अ.५२)।

